न

नमिति॥ तथा॥ आराममस्य पश्यंति न तं पश्यति कश्चनेति॥ तव महिमा वाङ्मनसयोर्वाङ्मनसे
अवतुरेत्यादिना निषिद्धातः तयोः पंथा नं मार्गं अतीतः यतो वाचो निवर्तंते अप्राप्य मनसा सह
इत्यादिश्रुतेः न चाहेतो॥ यतस्तन्महिमा वाङ्मनसागोचरस्ततः कारणात्त्वं न केनापि विशिष्यस
इत्यर्थः॥ यं च श्रुतिर्वेदोपि चकितं सभयं यथास्यात्तथा अतद्व्यावृत्त्या न तु स्थूलप्रपंचा
दि तद्भिन्नमतत् ब्रह्म ततो व्यावृत्तिर्निवृत्तिरतद्व्यावृत्तिस्तया अतद्व्यावृत्तिपुरस्कारेण अहं
ब्रह्मणो निर्वक्तास्मीति स्वनिष्ठस्य बाधित्वेनाभिधत्ते॥ यथा कश्चिदज्ञो नैव वस्तु पृष्टः पुमान्नेदं सा
वदति नेदं मया ज्ञायत इति तथा श्रुतिरपि यं सर्वे वेदा न विदुरित्यादिका स्वनिष्ठस्य बाधित्वेने
श्वरं प्रतिपादयंती स्वस्यापि तद्विषयेऽज्ञानमेवांगीकरोति न पुनस्तद्गुणाभिज्ञत्वं॥ यतो वाचो
निवर्तंते इत्यादिश्रुतयोपि श्रुतीनां तदविषयकत्वे प्रमाणं॥ यथा हि स्वाध्यायोध्येतव्य इत्य
ध्ययनविधिः सर्वस्यापि स्वाध्यायस्याध्ययनं बोधयन् स्वस्यापि स्वाध्यायांतर्गततया

ऽध्ययनं विधत्ते तथा यतो वाचो निवर्तन्ते इत्यादिश्रुतिवाक्यं सर्ववाचां परमेश्वरावृसन्नग
तित्वं बोधयन्न स्वस्यापि सर्ववागंतर्गतत्वात्तथात्वं बोधयति। अनंतगुणवैशिष्ट्येनेश्वरस्य
स्तोतव्यत्वं युक्तिविरुद्धमपीत्याह। कतिविधगुणाः कस्य विषय इति। कतिविधा अनेक
प्रकारा गुणा यस्य स अनंतगुणशाली महेश्वरः कस्य विषयः न कस्यापीत्यर्थः। न ह्यसंख्या
तगुणाः केनापि वर्षसहस्रेणापि विशिष्य वक्तुं शक्याः। तथा च भागवते। कालेन यैर्वा
विमिताः सुकल्पैर्भूपांसवः खे मिहिका द्युभासः इत्यादि। श्रुतिरपि। विष्णोर्नुकं वीर्याणि
प्रवोचं यः पार्थिवानि विममे रजांसीति॥ ॥तर्हि कथं स्तुत्यधिकार इत्यत आह पदे
त्वर्वाचीन इति। भक्तानुग्रहार्थं लीलया गृहीते वृषभपिनाकादिविशिष्टेऽर्वाचीने स्व
रूपे तु कस्य मनो वचश्च न पतति अपि तु बलादेव ममापीत्यर्थः॥ यद्वा भक्तानुग्रहार्थं
गृहीतमर्वाचीनमपि त्वत्पदं ज्ञातुं न शक्यत इत्याह पदे त्वर्वाचीने इत्यादिना। तुरप्यर्थे।

कस्यब्रह्मणोप्यर्वाचीनपदेल्लीलयाभक्तानुग्रहार्थंगृहीतेरूपेचवोमनश्चनपततीत्यर्व
वीचीनमपिपदंब्रह्मणोपिदुर्ज्ञेयंतत्रकिमुवक्तव्यंमुत्कृष्टंपदंनज्ञायतइतिभावः॥तथाच
भागवते॥अस्यापिदेववपुषोमदनुग्रहस्यस्वेच्छामयस्यनतुभूतमयस्यकोपि॥नेशे
महित्ववसितुंमनसांतरेणसाक्षात्तवैवकिमुतात्मसुखानुभूतेरिति॥२॥ ॥मधुस्फी
तावाचःपरमममृतंनिर्मितवतस्तवब्रह्मन्किंवागपिसुरगुरोर्विस्मयपदं॥ममत्वे
तांवाणींगुणकथनपुण्येनभवतःपुनामीत्यर्थेस्मिन्पुरमथनबुद्धिर्व्यवसिता॥३॥ हे
ब्रह्मन्तवसुरगुरोर्बृहस्पतेरपिस्तुतिरूपावाक्किंविस्मयपदंचित्तचमत्कारावे
हंभवतिनेत्यर्थः॥किंभूतस्यतवमधुवत्सुरसत्वेनस्फीताविख्याताअमृतसाधन
हेनामृतभूतावेदरूपावाचोनिर्मितवतः॥नहिपंचमस्वरमात्रपतःकोकिलस्यकी

३

रकूजितं चमत्कारायेति भावः। अत्रा स्मर्यमाणकर्तृकत्वेन वेदस्यापौरुषेयतया निर्मा
णापेदे नास्ति व्यक्तिरेव विवक्षितेति मीमांसकमतानुसारिणः। भट्टमतानुवर्त्तिपौराणि
का अप्येवमेवाहुः। तथा च भागवते स्वयंभूरेष भगवान् वेदो गीतस्त्वया पुरा। शिवाद्या
ऋषिपर्यंताः स्मर्तारोऽस्य न कारका इति। कपिलकणादगौतमैस्तु छिद्यैर्ब्रह्माद्यपर्यंतं
वेदेस कर्तृकस्मरणात्तस्मात्तपस्तेपानाच्चत्वारो वेदा अजायंतेत्यादिश्रुतिलिंगा
च्च वेदस्य पौरुषेयतया निर्माणमात्रोऽसत्तिरूपमेवेति तार्किकप्रभृतयः। एवं चैषां
मते प्रागुक्तपुराणवाक्यस्य प्रत्यक्षश्रुतिविरोधेन सर्वौदुंबरीवेष्टनप्रतिपादकस्य
तरौदुंबरीस्पृष्ट्वोद्गायतीति प्रत्यक्षश्रुतिविरोधेनाप्रामाण्यवद् प्रामाण्यमन्यपरत्वं
वाकल्पनीयं नैयथाश्रुतपरत्वं। वेदाः शास्त्राण्यन्यवाक्यार्थगोचरपर्यायार्थज्ञानजन्या
पुन

प्रमाणान्तराद्धत्वाद्भारतादिवादिसत्त्वनुमानेनपौरुषेयत्वसिद्धेश्च।नचप्रत्यमानवेदेबाधोम
न्वादिस्मृतौचव्यभिचारःतेषांद्विकर्तृकत्वात्।अथवावाक्यार्थगोचरयथार्थज्ञानपूर्व
कमात्रेणशब्दप्रामाण्योपपत्तौशब्दाजन्यत्वंविशेषणमप्रयोजकंस्यादेवंचपूर्वपक्षबाध्या
पक्षोच्चरितत्वेदादुत्तरोत्तरस्याध्येतुस्तदर्थप्रतीतिरियमनादितैवास्तुकिमीश्वरेणेतिचे
न्नमूलभूतप्रमाणाभावेनान्धपरंपरापातात्॥किंचाध्ययनप्रवाहाविच्छेदेसत्येवंस्या
त्सेवंतुनास्तिप्रलयेऽध्ययनविच्छेदात्।प्रलयंचानुपदमेवसाधयिष्यामइतिदिक्।
तर्हिकिंस्तुत्येत्यतआहममत्विति।हेपुरमथनभवतोगुणकथनपुण्येनतांस्वांवाणींपु
नामिनिर्मलांकरोमीत्येवंरूपेऽर्थेममबुद्धिरुद्यतानतुस्तुतिकौशलेनेत्यहंकारंजयामीत्यपि
प्रायेणस्पष्टार्थः।उक्तंचसावाग्ययातस्यगुणान्गृणीतइति॥३॥तवैश्वर्यंयत्तज्जगदुदय
रक्षाप्रलयकृत्त्रयीवस्तुव्यस्तंतिसृषुगुणभिन्नासुतनुषु॥अभव्यानामस्मिन्वरदर

5

मणीयामरमणीं विहंतं व्याकोशीं विदधत इहैके जडधियः ॥४॥ हे वरद तव यदैश्वर्यं तद्वि
ह लोके केचिन्मंदमतयः विहंतुं दूषयितुं व्याकोशीं कुतर्करूपां विदधते कुर्वंति। तथा हि यन्नो
पलभ्यते तन्नास्ति विपरीतमस्ति न चेश्वरस्तथा ततो नास्तीत्येवं न्यायः एवमनुमानादिवि
लोप इति चेन्न एतमस्माकमनिष्टं तथा च लोकव्यवहारोच्छेद इति चेन्न संभावनामात्रेण त
त्सिद्धेरित्यादि कुसुमांजल्यादिनिबंधेषु पूर्वपक्षावसरे स्पष्टीकृतं। कथंभूतां व्याकोशीं
अस्मिन् त्वदीयैश्वर्यविषये अभव्यानां न विद्यते भव्यं मंगलं येषां तेषां तथा शिवद्रोहि
णस्तेषां रमणीयां। पुनः कथंभूतां अरमणीयां। सत्तर्काभ्यासभ्रमराणां विशेषेण पुरस्कार
णीयां। तथा हि। संभावना हि संदेह एव तदधीनो व्यवहारस्तस्मिन्नस्ति स्यादेवं तु कुतः।
दर्शनदशायां भावनिश्चयात् अदर्शनदशायामभावधारणात् तथा च गृहान्निर्गतस्त्वा
दी कवराको न निवर्तेत प्रसक्तपुत्रदारधनाद्यभावावधारणाच्छोकविकल एव स्यात्।

वार

परावृत्तोपि कथं पुनरासंदेयिष्यति। सत्वादिति चेदनुपलंभकालेपि तर्हि संतीति न तावन्मा
त्रेणाभावावधारणं तैर्द्देवोस्मन्नाइति चेन्न अनुपलंभेन हेतूनां बाधनात्। अत एव प्र
त्यक्षमपि न स्यात् तद्धेतूनां च ज्वरादीनामनुपलंभबाधितत्वात्। उपलभ्यंत एव गोल्ली
करूपत्वात्तेषामिति चेन्न तदुपलब्धेः पूर्वं तेषामनुपलब्धेः। तस्मान्नानुपलब्धिमा
त्रादभावनिश्चयः किंतु योग्यानुपलब्धेः न चात्र सा विद्यते। परात्मन अयोग्यत्वात्
तदृष्टुः। योग्या दृष्टिः कुतोऽयोग्य इति। कथंभूतमैश्वर्यं। जगदुदयरक्षाप्रलयफलं॥
जगदुत्पत्तिस्थितिविनाशादिरर्थः॥ एतेन जगत्सर्गादिहेतुत्वेन परमेश्वरसिद्धि
रिष्टोक्तं भवति॥ ॥ननु प्रेक्षावत्प्रवृत्तिः स्वार्थकारुण्याभ्यां व्याप्तत्वेन जगत्सर्गाद्या
वर्तमाने प्रेक्षावत्प्रवृत्तिरूवें कत्वमपि निवर्तयतः। न ह्यवाप्तसकलकामस्य भगव
तस्त्रैलोक्यमसृजतः किमप्यभिलषितं भवति। नापि कारुण्यादस्य सर्गे प्रवृत्तिः। प्रा

कृ सर्गाज्जीवानामिंद्रियशरीरविषयानुसक्तौ दुःखाभावेन कस्य प्रहाणेच्छा कारुण्यं।
सर्गोत्तरकालं तु दुःखिनो वलोक्य कारुण्याभ्युपगमे तु रुतेतरमितरेतराश्रयत्वं। का
रुण्येन सृष्टिः सृष्टा च कारुण्यमिति। अपि च करुणया चेत्सृजेत्सुखिन एव जं
तून सृजेन्न विविधान्। कर्मवैचित्र्याद्वैचित्र्यमिति चेत्कर्मनिमित्तमेव जगद्वैचित्र्य
मस्तु किमनेनापेक्षितकीटादिविज्ञानवतेति॥ किं च आनंदो ब्रह्मेति श्रुत्यान्नित्य
तृप्तः परमेश्वरस्तादृशस्य सृष्टिविषयायामिच्छायामभ्युपगम्यमानायां नित्यतृप्ति
र्विहन्येतानभ्युपगम्यमानायामबुद्धिपूर्विका सृष्टिः च स्यात् उन्मत्तनरतुल्यताप्रस
ज्येति चेदत्र ब्रूते॥ लोकवत्तु लीलेति न्यायेन जगत्सर्जनोपपत्तेः। यथाबुद्धिमद्भिरेव
राजादिभिरंतरेण प्रयोजनं लीलया मृगयादिप्रवृत्तिः क्रियते श्वासोच्छ्वासव्यवहार
श्च सार्वजनीनः व्यर्थश्चेष्टाश्च बालकैर्वै कुर्वाणैः क्रियमाणा दृश्यंते तेन तथा नित्यतृप्तोपीश्व
रः प्रयोजनं विनाप्यनुन्मत्तः सन्नेवं जगत्सृजति॥ तदुक्तं। लीला श्वासवच्चेष्टा अ

तः सं

नुद्दिश्यफलं यथा । अनुन्मत्तैर्विरच्यं नेत तस्मात्तत्तस्तथा सृजेदिति । तथा च श्रुतिः । यतो
वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीति ॥ तथा र ष सर्वाणि
भूतानि समभिव्याप्य मूर्तिभिः । जन्मवृद्धिक्षयैर्नित्यं संभ्रामयति चक्रवत् । तथा । सर्व
भूतानि कौंतेय प्रकृतिं यांति मामकीं । कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहमि
ति ॥ पुनः कीदृशं ऐश्वर्यं त्रयीवस्तु । त्रयोऽवयवा यस्याः सा त्रयी अथर्वणस्तु त्रय्युद्धार
स्त्रय्यनुवादात्तस्याः वस्तुप्रतिपाद्यमिति यावत् । न संसेव हितेवेदभागान्यत्र परमे
श्वरो गीयते । तथा हि । स्रष्टृत्वेन पुरुषसूक्तेषु विभस्या रुद्रेषु राद्बलत्वेन मंडलब्रा
ह्मणे प्रपंचातिरस्कृत्यनिः प्रपंचतयोपनिषद्भ्यो यज्ञपुरुषत्वेन क्रतुविधिषु देहा
विभावैरूपाख्यानेषु उपास्यत्वेन सर्वत्रेति । ननु ब्रह्मण एव जगत्स्रष्टृत्वं श्रूयते न तु
त्रिंभोस्तस्य संहारमात्रकर्तृत्वेन वर्णनादित्यत आह तिसृषु गुणभिन्नासु तनुषु

विष्णोश्च जगत्पाल कत्वं ४२

व्यस्तं। यतो वा इमानि भूतानि जायंत इत्यादिश्रुत्योत्पत्तिस्थितिविलयानामेकमात्रकर्तृत्व
साध्यवसायेन ब्रह्मादित्रिकस्य पारमार्थिकमभेदमाश्रित्य सत्वरजस्तमोलक्षणगुण
त्रयभेदोपाधिकभेदवत्त्वाभ्युपगंतव्येति भावः॥४॥ किमीहः किंकायः स खलु किमुपाय
स्त्रिभुवनं किमाधारो धाता सृजति किमुपादान इति च॥ अतर्क्यैश्वर्ये त्वय्यनवसरदु
स्थो हतधियः कुतर्कोयं कांश्चिन्मुखरयति मोहाय जगतः॥५॥ अयं कुतर्कः प्रा[illegible]
लमलतया तर्काभासः कांश्चिदुपहतज्ञानात् बौद्धादीन् मुखरयति वाचालयति। किं
मर्थं जगतः व्यामोहाय ईश्वरसाधकप्रमाणेषु प्रामाण्यशंकाकलंकायेत्यर्थः। कुत
र्कमेवाह किमीह इति। का इहा चेष्टा यस्य सो किमीहः। घटादिकार्ये कुलालादेश्चेष्टा
द्वारैव हेतुत्वं दृष्टं न चेश्वरस्य चेष्टेति कथं तस्य कर्तृत्वं। तथा चेश्वरो यदि कर्त्ता स्याच्चे
ष्टावान् स्यात् कुलालवदिति तर्कोवगंतव्यः। किंकाय इति। ईश्वरो यदि कर्त्ता स्याच्छरी

रीस्यात्कुलालवदिति। किमुपाय इति। कः उपायः सहकारी यस्येति किमुपायः। एवं चेश्व
रो यदि कर्त्ता स्यात् किंचित्सहकारिविशिष्टः स्यादिति। किमाधार इति। असिद्धो हि कर्त्ता भू
तल्याद्याधारेण घटादिकार्यं करोति न चास्य कश्चिदाधारः एवं चेश्वरो यदि कर्त्ता स्यात्तदा
धिकरणकः स्यादिति तर्कः॥ किमुपादान इति। किं उपादानं सहकारिभूतं समवा
यिकारणं यस्येति तथा। कुलालो हि मृत्पिंडाख्यसमवायिकारणो घटादिकार्यं जन
यति न चास्य जगतः किंचित्समवायिकारणमस्ति। एवं चेश्वरो यदि कर्त्ता स्यात् स्यात्किं
चित्समवायिकारणसापेक्षः स्यादिति तर्कः॥ यद्यपि किमुपाय इत्यनेनैवासौ गतो
र्थस्तथापि गोबलिवर्दन्यायेन पृथगुक्तमिति ध्येयं। अत्र च सन्तीति शेषः तथा च धा
ताधातृरूपी परमेश्वरः किमीहः सन् त्रिभुवनं सृजतीत्यादियोज्यं। ननु किमुपा
यः किमुपादान इत्यनयोः कथं तर्काभासत्वं अदृष्टादेः सहकारित्वस्याक्षयादप्रभृति

11

भिः स्वीकारेण व्याप्तेर् विकल्पनीयत्। उपादानमपि सर्वैरनुमतत्वात्। तथाहि। अविद्या
वच्छिन्नं ब्रह्म ब्रह्मावच्छिन्नाविद्या वोपादानमित्यौपनिषदाः। परमाणव उपादानमि
ति नैयायिकाः। प्रकृतिरुपादानमिति कापिलाः। अदृष्टं वोपादानमिति कौमारिलाः।
ससं। न व्याप्तिमात्रेण सत्तर्कता। किंतु पंचांगोपेतत्वेन। न चास्य तथात्वमिष्टापत्ति
पराहतत्वात्। न दूक्तं। अंगपंचकसंपन्नस्तर्कस्तत्त्वज्ञानाय कल्पते। अंगान्यतमवैकल्ये
तर्कस्याभासता भवेत्॥ व्याप्तिस्तर्काप्रतिहतिरवसानं विपर्यये। अनिष्टाननुकूलत्वमिति
तर्कांगपंचकं॥ ४५ दि ति॥ किमीह इत्यादिश्वासप्रयोजकं तथा च तर्कत्वं। नहि कार्यमात्रं
प्रतिचेष्टाहेतुश्चेष्टायामेव व्यभिचारात्। उभयमते पिपीलिकादिकार्ये तदभावाच्च। किं
चेश्वरासिद्धौ व्याप्त्या सिद्धिः तत्सिद्धौ च धर्मिग्राहकप्रमाणेन कर्तृत्वसिद्धेर्नायं त
र्क इत्यादि तत्त्वचिंतामणौ सुव्यक्तं। एतदभिप्रायेणैवाह। स्वय्यनवसरदुःस्थ इति। सि
द्धासिद्धिव्याघातेनास्यानवसरग्रहस्तत्त्वमिति भावः। अत्र हेतुगर्भं विशेषणमाह

अतर्क्यैश्वर्य इति। कुलालादेर्घटादिकार्ये शरीरादेरपेक्षायामपि क्षित्यादिकार्ये किमाया तं
अचिंत्यसामर्थ्यमितिशयो हि भगवान् विनैव शरीरादिना जगज्जनयतीति भा
वः॥ सर्वोप्ययमर्थोष्टमाष्टके एवं प्रश्नोत्तराभ्यां विस्पष्टीकृतः। तथा च श्रुतिः। किं
स्विदासीदधिष्ठानमारंभणं कतमत्स्वित्कथासीत्। यतो भूमिं जनयन् विश्वकर्मा
वि द्यामौर्णोन्महिना विश्वचक्षा इति। ईश्वरस्य द्यावापृथिव्योरुत्पादनवेलाया
मधिष्ठानं। किं स्विदासीत् आरंभ्यतेऽनेनेत्यारंभणमुपादानं। तदपि कतमद्भवेत्।
किं च कथासीत्कथमासीदित्यर्थः॥ नित्यमनित्यं वा॥ नित्यत्वेपि तत्प्रत्यक्षमप्रत्यक्षं वा
नाद्यः प्रत्यक्षेणानुपलंभात्। नांत्यः। तथा सति सत्वे प्रमाणाभावात्। नानुमानं प्र
माणं लिंगाभावात्। अनित्यत्वेपि तत्सकारणमकारणकं वा। नाद्यः। अनवस्थापा
तात्। न द्वितीयः। तद्वदेव तद्भिन्नजन्यस्यापि कारणं विनोत्पत्तौ तत्र प्रमाणाभावा

दिनोतिवेः। यतो यस्मादारम्भणात् अधिष्ठानाच्च भूमिं विश्वचक्षाः सर्वद्रष्टा विश्वकर्मा
परमेश्वरो भूमिं जनयन् वर्त्तते। तथा द्यां दिवं व्यौर्णोत् व्यवृणोत् स्वष्टवान् स्वमहिना स्व
महिम्ना। अथोत्तरमाह। विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः इति। विश्वतश्चक्षुः विश्वविष
यकसाक्षात्कारवान् विश्वतोमुखः सर्वविषयकवचनवान् विश्वतोबाहुः विश्वविष
यकप्रयत्नवान् विश्वतस्पात् विश्वव्यापी। बाहुभ्यां धर्माधर्माभ्यां पतत्रैः परमाणु
भिः सं धमति संयोजयति। किमर्थमित्यत आह द्यावाभूमी जनयन्। द्यावेत्यूर्ध्वलो
कसप्तकं। भूमीत्यधोलोकसप्तकमुपलक्षितं॥ संपदद्वयं व्यवहितान्वेति छांदससू
त्रेण धमनजननाभ्यां मन्वीयते। ईदृशोस्येश्वरस्य सत्वेपि पितरद्धो नेकारणं प्रकृतिर्द
र्शयति। नतं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव। नीहारेण प्रावृता जल्प्या

वासुञ्चपउनथन्नासध्वरंति॥ अन्यद्देशाकालांतरापेक्षयाभिन्नं। नीहारं वेदां यज्ञिमूर्तां
नादिभ्नावरूपमविद्यात्मकं तार्किका यज्ञिमतं मिथ्याज्ञानं वा। जल्प्या प्राग्युक्तकुतर्कोक्त्या
प्रावृताः। अस्तुच्चपः केनाप्युपायेनास्तु नूप्राणानूच्च प्यंतः उदरंभराः नतु पारमेश्वरं
तत्त्वं विचारयंति। उक्तं च प्रउगाख्यं त्रांसंतस्वरति काम्यकर्मोपलक्षणमेतत् काम्यकर्मैवा
नुतिष्ठंति नतु परमेश्वरार्पणधियेतियावत्॥५॥ अनुमानप्रमाणादीश्वरं साधयन्ने
व स्तौति। अजन्मानो लोकाः किमवयववंतोपि जगतामधिष्ठातारं किं भवविधिरनादृत्य
भवति। अनीशो वा कुर्याद्भुवनजननेकः परिकरो यतो मंदास्त्वां प्रत्यमरवर संशेरत इमे
॥६॥ हे ईशाये त्वां प्रति संशेरते त्वद्विषये विप्रतिपन्नास्ते मंदा मूर्खा मंगभाग्या वा ईश्वर
निश्चायकप्रमाणसज्ञावेपि तेषां संशयनिरासो न भवतीति महद्भाग्यं तेषां तथाहि कि
मिति महेश्वरे त्रौ संशयः किं क्षित्यादौ जन्यत्वाभावेन लिंगाभावात् उ जन्यत्वेपि तस्य कर्तृत्व

मिचारेण व्याप्त्यभावात् व्याप्तिसत्त्वेप्यनीश्वरेणार्थांतराद्बाधः सावयवत्वेन क्षित्यादेर्ज
न्यत्वे साधनादित्यत आह अजन्मानइति। अवयववंतोपि लोकाः किमजन्मानो भवंतीत्यर्थः॥
सावयवत्वं च यद्यपि नावयवजन्यत्वमजन्यत्वेवादिनं प्रत्यसिद्धेः तथापि समवेतद्रव्यत्वं त
त्वं। किं च जन्यत्वेन संप्रतिपन्नं घटत्वावच्छिन्नं पक्षीकृत्य जन्यत्वेन सकर्तृकत्वसाधनेपी
श्वरसिद्धिः स्वतंत्र घटादौ जीवस्यापि कर्तृत्वेकैलाव॥ नहि निर्जनप्रदेशे प्रबलतरवाताभिघा
तजन्यकपालोत्पत्तिजैर्विदलनेन स्थलेतदुपादानगोचरापरोक्षज्ञानादि विनेश्वरस्य क
स्यापि संभावितमित्यन्यत्र विस्तरः॥ नापि द्वितीय इत्याह। अधिष्ठातारमिति। जगतां भवविधि
धिरुत्पत्तिविधिः किमधिष्ठातारं कर्त्तारं विना भवतीत्यर्थः॥ तथा च क्षित्यादिकं सकर्तृ
कं कार्यत्वात् घटवदित्यनुमानान्न सिद्धिः॥ न तृतीय इत्याह अनीशो वेति। अनीशः
त्वे च स एव कश्चिद्घटादि कुर्यात्तर्ह्यस्य भुवनजनने कः परिकरः सहकारी। समर्थः नहि
क्षित्याद्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिव्यतिरेकेण क्षित्यादेरुत्पत्तिः संभवति।

नवास्मदादीनां क्लिष्टाद्युपादानगोचरापरोक्षज्ञानादिकमस्तीति भावः ।तथा चश्रु
तिः ।यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।यो देवानां नामधा
एक एव तं संप्रश्नं भुवना यंत्यन्या ॥१॥ अयमर्थः ।यः परमात्मा नोस्माकं पिता पाल
यिता जनिता विधाता धारकः यश्च नोस्माकमुत्पन्नानां देवानां धामानि तेजोधिष्ठाना
नि वेद वेत्ति ।यो विश्वानि भूतजातानि वेद वेत्ति ।तथा देवानामग्निवाय्वादीनां नामधाः
नाम्नां विधाता इंद्रादीन्निर्माय तेषां नाम निर्माता ।एक एव स्वसमानजातीयरहितः
तं देवं ।अन्या अन्यानि भुवनाभूतजातानि मंदभाग्यानि प्रश्नं परमेश्वरविषयं संप्रा
यं यंति प्राप्नुवंति ॥६॥ त्रयीसांख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने प
रमिदमदः पथ्यमिति च ॥ रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्व

१०

मसि पयसामर्णव इव॥७॥ हे अमरवर साक्षाद्ब्रह्मप्रति पादकत्वाद्वेदः प्रणास्था
तदुपयोगित्वात्कुटिला वक्रा ये पंथानस्ततच्छास्त्रानुसारि मार्गास्तान्जुषंते भजंतीति
थाभूता ये पुरुषास्तेषां त्वमेवैको गम्यः प्राप्योसि न त्वदं॰ ः। यथा यमुनासरस्व॰ दी
नां गंगादिद्वारा गंगादीनां च साक्षादेव समुद्रः प्राप्यः एवं साक्षाद्ब्रह्मविद्याश्रवणनि
ष्ठानां साक्षात्त्वं प्राप्यः। अन्येषां पुनरंतःकरणशुद्धिद्वारा तन्मतेन परंपरया त्वमेव प्रा
प्यः। चेत॰ त्वेन मोक्षयोग्यत्वाद्दुःखरासमनोऽनभ्युपगमनात्सर्वथा। ऋजुमार्गमुपेक्ष्य
किमिति कुटिलमार्गं भजंत इत्यत आह इति प्रकारेण प्रभिन्नेऽनेकविधे प्रस्थानेऽइ
दमेव परं पथ्यं अदः परं पथ्यं हितमिति यत्र रुचीनामिच्छाविशेषाणां वैचित्र्यं अनेकप्र
कारत्वं तस्मादित्यर्थः। प्रस्थानभेदमेवाह त्रयीमिति। त्रयी वेदत्रयी। सांख्यं भगवता

सारितद्वदेवात्मविद्योपयोगि॥ न्यायशास्त्रमपि अन्वीक्षापि गौतमप्रणीतपंचाध्या
यात्मिका अहनकांडार्थनिर्णयप्रयोजकतर्कव्युत्पादकतया श्रुत्युपेवनासर्यमे
जते। हल्लेशाकटादिप्रसंख्यानावानोपि ज्ञानोपयोगिम्यौन स्मार्तकर्मोपयोगि ब्रीह्या
दिद्रव्याधिगमप्रयोजनत्वेन तत्रैवान्चेति। एवं स्वाम्यमात्यादिनेयनुविधायि दंड
नीतिस्मा सामदानविधिर्गमद्वारा प्रजापालनोपयोगि प्रजापालेना
श्रौतस्मार्तकरणस्तुध्युपयोगि धर्मप्राप्तिरित्यादि स्मृतीतिहासपुराणेषु प्रसिद्धं। धर्म
शास्त्रं च धर्माधर्मावबोधकत्वेनांतःकरणशुध्योपयोगीति स्पष्टमेव। वेदांगानां
पुनः शिक्षादीनां प्रधानीभूतवेदोपकारद्वारैव पुरुषार्थपर्यवसायित्वं। आयु
र्वेदस्यापि तत्करणशुध्यापादककर्मोपयोगि शरीरारोग्योत्पादकत्वेन पजप्रकी

रोपदर्शकत्वेन तत्रैव तात्पर्यं। धनुर्वेदस्यापि शरीरद्वारैवोपयोगः। धनुर्विद्याभिज्ञान
नो हि कदाचित्प्रबलतरवैरिनिक्षिप्तशस्त्रास्त्रसमूहाक्षेपणमात्रेण शरीरं न त्यजेत्। गां
धर्वमपि सद्यः परमेश्वरप्रसादकमत्यंतपुरुषार्थोपयोगि। यदाह याज्ञवल्क्यः॥
वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः॥ तालज्ञश्चाप्रयासेन मोक्षमार्गं निग
च्छतीति। तथा गीतज्ञो यदि गीतेन नाप्नोति परमं पदं। रुद्रस्यानुचरो भूत्वा तेनैव स
ह मोदते इति। सांख्यमपि प्रकृतिपुरुषयोर्विवेकं बोधयत्पुरुषार्थोपयोग्येव। यो
गशास्त्रमपि परमात्मसाक्षात्कारोपयोगिषडंगोपेतध्यानप्रकारोपदर्शनद्वारा त
त्रैव पर्यवस्यति। पाशुपतमपि पशुपाशविमुक्तिफलकेश्वरचिंतनात्मकयोगप्रका
रोपदर्शकतया तत्रैवान्वेति। तदुक्तं कूर्मे। चिंतयेत्स्वात्मनीशानं परंज्योतिःस्वरूपिणं॥

एवं पाशुपतो योगः पशुपाशविमुक्तय इति शैवा एवमपर्यंतकरणाश्रुत्या पादकवृतो
पवासादिप्रतिपादनेद्वारान्त्रैवतासर्वमन्नत इति सिद्धं सर्वेषामपि वाक्यानां ब्र
ह्मणि तात्पर्यं न हि केपि धर्मिणि विप्रतिपन्नाः। यदाहुः कुसुमांजलावुदयनाचा
र्याः। शुद्धबुद्धस्वभाव इत्यौपनिषदाः। आदिविद्वान् इति कापिलाः। क्लेशकर्म
विपाकाशयैरपरामृष्टो निर्माणकायमधिष्ठाय संप्रदायप्रद्योतकोऽनुग्राह
क इति पातंजलाः। लोकवेदविरुद्धैरपि निर्लेपः स्वतंत्रश्चेति महापाशुपताः।
शिव इति शैवाः। पुरुषोत्तम इति वैष्णवाः। पितामह इति पौराणिकाः। यज्ञपुरुष
इति याज्ञिकाः। सर्वज्ञ इति सौगताः। निरावरण इति दिगंबराः। उपास्यत्वेन देशि
त इति मीमांसकाः। लोकव्यवहारसिद्ध इति चार्वाकाः। यावदुक्तोपपन्न इति नैयायिकाः।

।सि द्ध ४

किं बहुना कारणोपि अयं विश्वकर्मैव उपास्यत इति ॥६॥ महोक्षः खट्वांगं परशुरजि
नं भस्म फणिनः कपालं चेतीयत्तव वरद तंत्रोपकरणं ॥ सुरास्तां तामृद्धिं दधति तु
भव द्भ्रूप्रणिहितां नहि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥७॥ हे वरद इति
प्रकारं इयत्संख्याकं तव तंत्रस्य कुटुंबस्य उपकरणं साधनं तदेवाह महोक्ष इ
त्यादि लोके हि परोपकारकरणसमर्थस्याप्यसंतमाडंबरं दृश्यते न तु सकलै
हिकामुष्मिकोपकारसमर्पणसमर्थस्याडंबरलेशोपि नास्तीति व्यतिरेकालंकारः।
महानुक्षा वृद्धवृषभः ॥ खट्वांगशब्देन दंडारोपितशिरःकपालमेको ध्वज उच्यते
न पुनः खट्वैकदेशः ॥ अमुमेव श्लोकं निदर्शनीकृत्य खट्वांगकपालपाणिरिति गोत
मस्मृतौ खट्वांगशब्दस्य यथोक्तध्वजपरत्वेनैव विज्ञानेश्वरकृतायां व्याख्यातत्वात् ॥

परशुः कुठारः। अजिनं गजचर्म। ... प्रसिद्धं। फणिनः सर्पाः। कपालं मनुष्यशिरोस्थि। चेति
मस्तकं। सुरास्कंदहस्ताडंबरलेपस्पर्शनोपकारेण विशिष्टस्यापि भवतः करुणां कितवस्य विले
पमात्रेण समर्पितां तां नत्वा कामेन नाविषयीकृतां समृद्धिं धारयंतीति॥ अथवा च तुर्दशभुव
नमहाराजस्य भगवतो महेश्वरस्य महोक्षादिशब्दैनुतत्तच्छक्तिविशेषाउपलक्ष्यंते। त
वं च गजरथतुरगादियानाद्यधिष्ठितशक्तिर्महोक्षाकारेण। चतुर्दशभुवनसाम्राज्यल
क्ष्मी लक्ष्मभूतछत्रचामरपताकाद्यधिष्ठितशक्तिर्ध्वजाकारेण। सकलासुरसंहार
कराशक्तिः कुठाराकारेण। सकलजगदावरणशक्तिरजिनाकारेण। सकल ब्रह्मांड
संहरणशक्तिर्भस्माकारेण। सकलचराचराधिष्ठानशक्तिः सर्पाकारेण। सकलजी
वादृष्टाधिष्ठानशक्तिः कपालाकारेण परिणतेत्यवगंतव्यं। ननु तादृशशक्तीनामति
नीचाकारेण कथमवलंबनं कृतमित्यत्रोत्तरं नहीत्यादि। स्वात्मनी स्वस्वरूपे आरमति

१३

क्रीडतीति स्वात्मारामः स्वात्मा स्वस्वरूपमेव आरामः विहारवनं यस्येति वा स्वात्मनै
व स्वस्वरूपिणैव सर्वं आरमती मत्स्वरूपमेवेदमिति पश्यतीति स्वात्मारामस्तं विषयलक्ष
णामृगमरीचिकानेष्वामोहयतीत्यर्थः ॥७॥ ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमि
दं परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये ॥ समस्तेऽप्येतस्मिन्पुरमथन तैर्विस्मित इ
व स्तुवन् जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥८॥ हे पुरमथन अहं तैरनीश्वर
वादिभिः सह वादं कुर्वन् तदीयपूर्वपक्षं श्रुत्वा सिद्धांतं कीर्तयन् न खलु निश्चयेन जिह्रेमि
लज्जे। तदीयपूर्वपक्षानुवादं विनैव सिद्धांतमात्रकथनेऽननुभाषणं नाम निग्रह
भवेत् अत्र ग्राह्यदूषणानभिधानमननुभाषणमिति तल्लक्षणात्। पूर्वपक्षानुवादे तु म
मयाकथने प्रवर्त्तते तत्र स्वैर्निंदाभिधानात् तथा च तद्विषये विवदमानैः पापिभिः सह क
थाप्रसंगो न मादृशानामुचित इति भावः॥ कथंभूतोहं। समस्तेऽप्येतस्मिन्नीश्वरवा

१४

दिमते विस्मित इव। प्रमाणासिद्धेपि वस्तुनि कथमयथाप्रत्ययः पापराणामिति सजा
ताश्चर्य इत्यर्थः। अनीश्वरवादिमतमेवोपपादयति ध्रुवमित्यादि। कश्चित्सांख्यवादी
सर्वं ध्रुवं सदेव वदति। नहि कारणव्यापारात्पूर्वमसतः सत्त्वं संपादयितुं शक्यते।
तदुक्तं। असतः कारणात्पूर्वं सत्त्वं कः कर्तुमर्हति। नहि शिल्पिसहस्रेण नीलं पीतं क्रि
यतेदिति॥ तथा चास्मिन्मते न जगदुत्पादकत्वेन भगवत्सिद्धिरित्याशयः। अपरस्तु
क्षपणकः सकलमध्रुवं क्षणिकं गदति। न चैवं स एवायं घट इति प्रत्यभिज्ञानानुपप
त्तिः सैवेयं दीपज्वालेतिवत्तज्जातीयविषयत्वेनैवोपपत्तेः। एवं च प्रमेयमात्रस्य क्षणिके
नतया न नित्यसर्वज्ञेश्वरसिद्धिः। परस्तु भट्टाचार्यः जगति ध्रौव्याध्रौव्ये नियतानियते
वदति। कथं स्यादेते। व्यस्तविषये व्यस्ताभिन्नः विषयो यथास्तु तथा। तार्किकादिजिरनि
सिद्धेन संप्रतिपन्नस्य प्रवाहात्मना नित्यत्वं व्यक्त्यात्मना चानियतत्वं। अहोरात्रे मध्यवर्ति॥

१४

होरात्रपूर्वकमितिव्याख्या प्राचीनप्रवाहाविच्छेदसिद्धेः। अहोरात्रमहोरात्रात्पूर्वं प्रा
चीनंतिव्याख्या चार्येऽपिन प्रवाहविच्छेदः। प्रवाहविच्छेदे हि कथमनित्यानां कल्पसूत्रा
दीनां नित्यब्रह्मयज्ञविधिविधेयत्वं भवेत्। एवं च सर्गप्रलययोरभावान्न तत्कर्तृ
त्वेनेश्वरसिद्धिः। ननु तदीयपक्षखण्डनार्थं तदीयपूर्वपक्षानुवादः कथं नोचित
इत्यत आह मुखरतावा वाच्छनात्यद्विषये धृष्टानप्रगल्भान न शोभत इत्यर्थः।
कथमपि परमेश्वरनिंदाभिधायकशब्दप्रयोगो न कर्तव्य इति संकल्पशील
स्य याद्दृक्तादृके वाचालता न शोभत इति भावः। अत्रेदमाकूतं। कारणव्यापा
रात्पूर्वमपि कार्यस्य सत्वे इदं जातं घटं उत्पन्न इत्यादि व्यवहारानुपपत्तिः। न चास्य
इदं जातं घटाभिव्यक्तिरित्यर्थः। अभिव्यक्तेरभिव्यंजकात्पूर्वं विद्यमानत्वे वैयर्थ्यं

५

मभिव्यंजकस्य। अविद्यमानत्वे च पूर्वमसत्याल्वाभिव्यक्तेः सत्वाभ्युपगमापत्तिः। अ
भिव्यक्तेरभिव्यक्त्यंतरकल्पनायां चानवस्थापत्तिः। यस्तु वस्तुमात्रमनित्यमित्या
ह स प्रष्टव्यः। अनित्यत्वं नित्यमनित्यं वा। नाद्यः वस्तुमात्रस्यानित्यत्वप्रतिज्ञाभंगा
त्। नापि द्वितीयः। यत्रैवानित्यत्वविनाशस्तत्रैव नित्यत्वस्वीकारापत्तेः। यस्त्वाह प्रवा
हस्याविच्छेद इति स प्रलयसमर्थनादेव निरसनीयः। तथा हि। कालेकपालान्यावृ
त्ति घटप्रागभावः कार्यद्रव्यानधिकरणत्वचिरस्थायित्वादाकाशादिवदन्योन्याभाव
वदिति व्यक्तं प्रलयसिद्धिः। एवमेवैतत्कालीनघटध्वंसं पक्षीकृत्यागामिप्रलयसाध
नं। नासदासीन्नो सदासीदिति श्रुतेश्च। तदुक्तमाचार्यैः। परमाणुसाङ्कवितरिअंलो
डमाभांडे तदंतःपातिनः प्राणिगणाः क्वचित्तां कुपितकपिकपोलतां नगेतोदुंबरम

१५

राकसमूहवत्दवदहनदह्यमानदारूदरविघूर्णमानघुणसंघातवत्प्रळयप
वनोल्लासनीयोगेवीनल्लनिपातिपोतसांयात्रिकसार्थवद्देति। मध्येप्रवाहविछे
दाभ्युपगमेपिसर्गप्रळययोरनादित्वात्सर्वपूर्वसर्गसिद्धकल्पसूत्राण्यादाय
विधिप्रवृत्तिरिति संक्षेपः॥९॥ तवैश्वर्यंयत्नाद्यदुपरिविरंचोहरिरधःपरिछेत्तुंया
तावनलमनलस्कंधवपुषः॥ ततोभक्तिश्रद्धाभरगुरुगृणद्भ्यांगिरिशयत्स्वयंत
स्थेताभ्यांतवकिमनुवृत्तिर्नफलति॥१०॥ हेगिरिशगिरौशेतइतिगिरिशः। गि
रिर्निवासत्वेनयस्यास्तीतिवागिरिशः शब्दस्यछांदसत्वेपिगिरिशमुपचचारेत्या
दिप्रचुरमहाकविप्रयोगदर्शनाल्लौकिकत्वोपपत्तिः। तवकिमनुवृत्तिः कुत्सिता
अनुवृत्तिरनुवर्तनं नफलतिफलदानभवतीत्यर्थः। कुतएतदगैवेतमित्यतआह

29

पत्रय स्मात्कारणाद् नलस्कंधवद्वपुर्यस्य तेजःपुंजननोस्त्वैश्वर्यं स्थूलरूपं ऽय
तयाऽवधारयितुमूर्ध्वं विधाता अधस्ताद् च्युतः परमप्रयत्नैर्नोभावपि तावत्या
तोगतौ परंतु अनलेन अलं अनलं परिछेत्तुमसमर्थौ विसर्थः । यत्र स्थूलरूपा
वधारणमसुकरं तत्र दूरे कथा सूक्ष्मरूपावधारणस्य ततः स्वयत्नवैफल्यानं
तरं ताभ्यां विधिहरिभ्यां श्लाघकृङिति चतुर्थौ तयोः स्वमाहात्म्य ज्ञानाय सर्थः । भ
वानस्वयंतस्थौ तयोः प्रयत्नैर्विनैव कारुणिकतया स्वस्वरूपं प्रकटीचकारेति
यावत्रातस्थ इति प्रकाशनस्थेयेति तङ् । कीदृशाभ्यां । भक्तिश्रद्धाभरगुरुयथा
भवति तथा गृणद्भ्यां । आराध्यत्वेन ज्ञानं भक्तिः वैदिकार्थे निश्चयः श्रद्धा तयोर्भ
रोऽतिशयस्तेन गुरुः निरतिशयं यथा स्यात् तथा गृणद्भ्यां स्तुवद्भ्यां । अथ च ताभ्यां
यत्र भवानामौ त्मानं प्रकाशयति स्म ततो वसीयते तव किं मनुष्टतिर्न फलतीत्यावसा

१८

30

त्रापियोजनीयं। तवानुवृत्तिः किं न फलति अपि तु सर्वमेव फलति तस्मात्साक्षात्कारपर्यन्तं फलं
ददातीत्यर्थः। यद्वा किं न ओ वा वधारणे इत्यभिधानात् किं नेति निपातसमुदायस्य एवकारार्थः।
ततश्चायमर्थः। तव किं न अनुवृत्तिः फलति तवैवानुवृत्तिः फलति नान्यस्येत्यर्थः। तवानुवृ-
त्तिः किं न फलति तवानुवृत्तिरेव फलति नाननुवृत्तिः कुत्सितानुवृत्तिर्वेति वा। यद्वा तवा-
नुवृत्तिः फलति किं न फलत्येवेत्यर्थः। कदाचिन्न फलतीति भावः। ज्योतिर्मयस्य शरीरस्य शिरसा-
वरणे शिरश्चालोकपितामहमधिकोऽहमधिक इति परस्पराधिक्ये विवदमानौ विष्णु-
पतिनिरासार्थं विष्णुब्रह्माणौ पातालसत्यलोकयोराहंकारेण तौ गतौ विष्णुश्चरणौ न
ददर्श ब्रह्मापि शिरो नापश्यदिति सहैतत्कार्यो वैवपुनरागत्य महेश्वरं क्षमस्वेत्यूचतुर्यो
रात्मस्वरूपं दर्शितमिति पौराणिकी प्रसिद्धिः॥ अथ वा पशुपतिर्भुवनपतिर्भर्ता नां पति-
१४ दर्शनीयमित्यादि भक्तिश्रद्धाप्रवं तुष्टुवतुः ततः परमकारुणिकेन परमेश्वरेण ताभ्यामात्म-

रिति त्रयोग्निभ्रातरो हविर्वहनाख्यभारेण मृतास्तत्क्रियाऽग्निरपि बहत्वं यत्कार
संवृतदरीमाश्रित्यावस्थितः ततस्तु हविरप्राप्तिदुःखपीडिताः सर्वे ब्रह्मादयो मि
लित्वा भगवतोऽग्नेर्गवेषणं चक्रुः। त्रिभुवनं पर्यटतोप्यग्निमपश्यंतोऽग्निस्त
तिमारेभिरे। ततोऽग्निः स्वस्वरूपं तान्प्रति प्रकटीचकारेति वैदिकी प्रसिद्धिः।
तथा च श्रुतिः। अग्नेः पूर्वे भ्रातरो अर्थमेतं रथीवाध्वानमन्वावरीवुः। तस्मा
द्भिया वरुण दूरमायं गौरो न क्षेप्नोरविजे ज्यायाः इति॥ अनयाग्निः स्वपलायन
निमित्तमाह हे देवा अग्नेर्मम पूर्वे पूर्वमुत्पन्ना भ्रातरो भूपतिर्भुवनपतिर्भूतानां
पतिरिति त्रयो भ्रातर एतं हविर्विहनाख्यं अर्थं अन्वावरीवुः। अनुक्रमेण वृत
वंतः। आवरणे दृष्टांतः। रथीवाध्वानं। यथा रथी अध्वानं मार्गं व्रजतीति तद्वत्।

तस्मात्मर णात् भीयाहे वरुण दूर दे शामायं। किंच सेहस्तः धनुषः स्पायाः सका शात् गौरो न गौरम्रगइव सयथा ब्रिभेति च लतिवातद्द्द विजे अकंपे॥१॥तथा इमं नो अग्न उपयज्ञमेहि पंचयामं त्रिवृतं सप्ततंतुं। असो हव्यवाळुत नः पुरो गा ज्योगेव दीर्घं तम आशयिष्ठा इति॥२॥ अनया गुहायां निगूढमग्निं इंद्रादयो देवा आकंत॥ हे अग्ने नो स्माकं इमं यज्ञं उपेहि उपागच्छ प्राप्नुहि मापलायिष्ठाः। कीदृशं यज्ञं पंचयामं। पंचभिः शब्दैः ॐ श्रावय। अस्तु श्रौषट्। यज। ये यजामहे। वषडिति एतैः शब्दैः यम्यते नियम्यत इति तथा तदृशं। पुनः कथं। त्रिवृतं। त्रिभिराह वनीयगार्हपत्यदक्षिणाग्निभिर्वृतं। सप्ततंतुं सप्तहोतृभिर्विस्तीर्यमाणं। ईदृशं यज्ञमागमनानंतरं च नः अस्माकं हव्यानां हविषां वोढा असः भव नः अस्माकं पुरो

१७

गाः पुरस्तोगंतामक्षम्। योऽहं चिरकालमेव त्वमस्मान्परिसृज्य दीर्घतमः महांधकारो
पेत गुहां आश्रयिष्ठाः तस्यां स्थापनमकार्षीः इत ऊर्ध्वं अस्मात्स्थानादस्मानाग
च्छेत्यर्थः। तथा चानलस्कंधोऽग्निरेव वपुः शरीरं यस्य स चासौ अनलस्कंधवपुस्तस्या
न्यात्मकस्य तवेति व्याख्येयं॥ विरंचि हरि ग्रहणं सर्वदेवोपलक्षणं। उपर्यधश्च
द्वावपि सर्वप्रदेशोपलक्षणौ। प्रागुक्त पौराणिक प्रसिद्धि संचारणार्थमुपरि वि
रंचो हरिरधः परिच्छेत्तुं यातावितिवचनभंगी। अनंतरोक्त वैदिक प्रसिद्धि संचार
णार्थं चानलस्कंधवपुष इतिवचनभंगी॥१०॥ ॥अयत्नादापाद्य त्रिभुवनमवैरव्य
तिकरं दशास्यो यद्बाहूनभृत रणकंडूपरवशान्॥ शिरःपद्मश्रेणीरचितचर
णांभोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदं॥११॥ हे त्रिपुरहर

२ १८

स्थिरायाः दृढायास्त्वद्भक्तेरिदं विस्फूर्जितं प्रभावः । किंभूताया भक्तेः शिरांस्येव प
द्मानि अर्थाद्रावणस्य तेषां पंक्तिस्तया कल्पितः पदपद्मयोर्बलिरुपहारो यस्यां सा
तथा । रावणेन हि नव शिरांसि स्वहस्तेन शंभोरुपहारः कृत इति पुराणप्रसिद्धं ।
किं तद्विस्फूर्जितमित्यत आह । यद्दशास्यो रावणः बाहून् विंशतिभुजान् रणाय यु
द्धाय कंडूः खर्जुरतिस्पृहेति यावत्तया परवशान् तदधीनान् अभृत धृतवान् रण
कंडूर्हि रणेनैव निवर्त्यतीत्यत आह । त्रिभुवनं न विद्यते वैरस्य विरोधस्य व्यति
करः कारणाय च तं तथा संपाद्य त्रैलोक्यं वैरिणो वीरानिंद्रादीन् स्वदासतां नीत्वे
त्यर्थः । तदपि अयत्नात् अयत्नेनैव । स्वयमेव रावणपराक्रममात्रेणैव सर्ववीराद
पीदृक्संरंभं न हसमाप्तायत इत्याकूतः ॥ वयं तु भ्रमः ॥११॥ तेन रसांबसदाशिवभक्तेः परमा

त्मसाक्षात्कारपर्यंतपर्यवसायिन्याः सकलवैरिपराभवमात्रं न फलत्वेन वर्ण
यितुमुचितमित्यन्यथाव्याख्यानमेतस्य मन्यं तदुच्यते। रावणो हि रघुपतिसंग
रावसरे त्रैलोक्यमपि रामाख्यपरब्रह्मात्मकतयाऽवगच्छन्न तदंतर्गतस्यात्मा
नमपि तदात्मकत्वेनैवापश्यत्तथा च सकलमपि जगदविद्यमानप्रतिद्वंद्वीयालो
च्य संग्रामविरतस्तथैव तद्दृष्टिस्थितः परमात्मसायुज्यं प्राप्त इति पुराणप्रसि
द्धं तथा च ब्रह्माद्वैतसाक्षात्कारनिरस्ताज्ञानसंदोहहृदयोद्यानेनाखिलभुवन
मवैरव्यतिकरं योगाभ्यासादियत्नैर्विनैव संपाद्य स्वबाहुनैकेनैव विघटनप्रति
भटसमरापायादृणकं कृत्वा नैव यद्धारयति स्मेतदिदं स्वकीयशिरःकमलावि
लीविरचितभगवच्चरणारविंदपूजनादितरपरमेश्वरभक्तिं विनापरब्रह्म

द्वैतसाक्षात्कारो भवति। तथा च। संग्रामादिप्रवृत्तिर्मोहमूलकः स च ब्रह्मसाक्षा-
त्कारेणैव विनष्ट इति नैतस्य रामात्मकजगद्वेषेण सति तत्प्रवृत्तिः। तथा च श्रुतिः।
यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वम-
नुपश्यत इति। यत्र त्वस्य सर्वमात्मैवाभूदित्यादि च ॥११॥ अमुष्य त्वत्सेवासमधि-
गतसारं भुजवनं बलात्कैलासेपि त्वदधिवसतौ विक्रमयतः। अलभ्या पाता-
लेप्यलसचलितांगुष्ठशिरसि प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः
॥१२॥ हे त्रिपुरहर त्वन्निवासभूते कैलासेपि स्वबलपरीक्षार्थं प्रसह्य भवत्से-
वामात्रलब्धे बले स्वकीयहस्तवृन्दं व्यापारयतः अमुमुत्साद्यलंकीनेष्वामीत्य
पिप्रायेण भुजचेष्टां कुर्वत अमुष्य रावणस्य पातालेपि प्रतिष्ठा स्थितिरलभ्या आसीत्

२०

कस्मिन् सति। त्वयि अल्पसंचालितं कंपनीतं अंगुष्ठशिरः अंगुष्ठाग्रं येन स तथा
तस्मिन् सति। एवं हि पुराणेषु प्रसिद्धं भगवत्प्रसादासादितबलेन रावणेन स्वब
लपरीक्षार्थं कैलासो समुद्धर्तुमारब्धः ततस्तद्भीतया पार्वत्या प्रार्थितो भगवान् स्व
कैलासस्याधोगमनार्थमंगुष्ठमात्रेणैव व्यापारयामास तावन्मात्रेणैव क्षीणबलो
रावणस्तच्छरीरेणाधो गच्छन् पाताले पि स्थितिं न लब्धवानिति। ननु भगवत्प्रसाद
लब्धबलो रावणः कथं भगवंतं विस्मृतवानित्यत आह ध्रुवं निश्चितं उपचितः समृ
द्धः सन् खलः कृतघ्नो मुधैव तिरस्कृतं विस्मरति स्वोपचयहेतुमपि न गणयति। सर्थेः
इक्ष्वाकुः। वयं तु अधमः नात्र रावणस्य निंदोदीर्यते किं तु भक्तिविशेषवत्तथा हि आह
रह लंकातः श्रीबदरीनार्थं कैलासमागच्छन् स कलत्रो वनिशरोमणिर्दशास्यः

२०

स्वामित्रपुत्रकळत्रादिभिरेवमभ्यर्थितः। प्रबळतरदोर्दंडेन भवता भगवानेवात्र
कुतो नानीयते कैलासप्रियो भगवानत्र कथं स्थास्यतीति चेत्कैलासोपि समुध्
त्यात्रैव संस्थापनीयः अपरं चेदमनुकूलं भविष्यति। भवतो भवस्य परिवार
भूतानामस्माकं च निरंतरं भगवत्सामीप्यं भविष्यतीति ततो सो रावणः कैला
समुद्धर्तुमुद्यत इति प्रसिद्धं तथा चायमर्थः। तामधिष्ठाय वसतिर्निवासस्त्व
दधिवसतिस्तस्य समीपस्थितिस्तन्निमित्तमतिदुर्घटेपि कैलासे भुजवनं व्यापार
यतो रावणस्य पाताळेपि प्रतिष्ठा अलभ्या आसीत्। इंद्ररोस्य रावणस्य त्वत्स
मीपस्थितावनुरागो यदर्थं प्रयतमानः स्वकीयानर्थसंभावनामप्यग्रेतनीं न वि
चारयति लोकेपि हि किंचिदभिनववयस्कप्राप्तये पर्यटन् पुमान् स्वीयजीवना

२१

जीवनप्रकारं न विचारितवान् वदं स्यापदे हं वा पातये त्सिद्धिं वा साधयेदिति। त्व
त्सेवा समधिगतसारं मिमन्ने नैतादृशः स्वर्गं किमु हि मायतोऽस्य सक्लं ब्रह्मां
डाधारभूतत्रिर्वाधिष्ठानभूतस्यापि कैलासगिरेरुद्धरणाशक्तिरिति ध्वनितं।
अथच त्वत्सेवार्थमेव समधिगतः सारो बलं येनेति तथा। त्वत्सेवार्थमेव समधिगतः सं प्राप्तः सारः सारभूतं वस्तु यस्मादिति वा यत्किंचिद् अर्जितं
तन्मूगवत्सेवार्थमेव न तु केवलं स्वोदर दरीपरी पूरणार्थं मोघमन्नं विंदते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य नार्यमणं पुष्यति नो सखायं केवलाघो भव
ति केवलादिति। निंदार्थवादश्रवणादिति भावः। ननु विवेकवान् परावणः
कैलासोद्धरणकाले पार्वत्या भीतिर्भविष्यति तत्प्रार्थितश्च भगवान्मामनिष्टं क
रिष्यतीति भाविनमर्थं कथं न विज्ञातवानेत्यत आह ध्रुवमुपचितोमुह्यति खलद्दति॥

२१

खलः स्वार्थमात्रदर्शी उपचितस्तमसा लोभानुरागाभिविशिष्टः सन्नमुष्मिन्तत्कार्यकरणे प्रवर्त्स्यमानः सन्निदमनर्थपर्यवसायीति न जानातीति ॥१२॥ यद्दृष्टिं सुचाम्णो वरदपरमो वैरपि सतीमधश्चक्रे बाणः परिजनविधेयत्रिभुवनः । न तच्चित्रं तस्मिन्वरिवसितरि त्वच्चरणयोर्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥१३॥ हे वरद परिचारकवत्स्वरूपं त्रैलोक्यं यस्य स एवंभूतो बलिसुतो बाणः सर्वोत्कृष्टामपीन्द्रस्य साम्राज्यलक्ष्मीं यत्तिरस्कृतवान् तत्तस्मिन्त्वदीयचरणारविन्दसमीपवर्तिनि नाद्भुतं यद्वा परिजनवत्स्वकीयकुटुम्बवत् या चरानैरपेक्ष्येणैव विधेयं पालनीयं त्रिभुवनं येनेति तादृशो बाणः फलाभावेनेन्द्रलक्ष्मीमधश्चक्रे याचनानैरपेक्ष्येणैव सर्वेषामर्थपूरणान्तदीया लक्ष्मीः स्वदारैकस्थिति कार्यकदर्यीकृतेतिभावः । इदं संपल्लेरधः करणं चत्वरकेन पर्यासं फल

किं लोकदेशमात्रमिसाहनकस्याइति। त्वयि विषये शिरसो यावनतिर्नम्रतासा वृद्ध्यै
उन्नत्यै न भवति अपि तु सर्वामेवोन्नतिं मोक्षपर्यन्तां जनयितुं समर्थो भवत्ये
व यो हि यथा यथा परमेश्वरं पूजयति तथा तथा सफलं प्राप्नोतीत्यर्थः। तथा च
भागवते। नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते।
यद्यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीरिति। सा कृ
पयं तु लोके पुतावदपकृष्टधनः पुमान् विषयविरक्तो भवति। उत्कृष्टधनो पिवा
परिजनवशीकाराभावालोद्दिष्टो भवति बाणस्तु पुनर्वशीकृतसकलवसुवनो
पीडापेक्षयोत्कृष्टो स्वकीयसमृद्धिं तिरस्कृतवान् तत्र तस्मिन् त्वच्चरणानु
वर्तने न चित्रं। यतस्त्वद्विषये भक्तिः कस्याः समृद्धेरपेक्षया उन्नत्ये उत्कृष्टसुखप्राप्त्ये

न भवति अपि तु सर्वस्या अपि कनकसुतदारादिसमृद्धेरपेक्षया भक्तिरेवोत्कृष्ट
सुखावहा भवतीति। प्रसक्त तक्षणभंगुरतया दुःखावहैव राज्यादिसमृद्धिर्यथोक्तं।
मधुरतरफलाशनाशयाऽऽरण्यनिविष्टस्य पांथस्य गगनतलस्पर्द्धिज्वालाजटिल
दववहनदह्यमानवनगतपनसोच्चैश्शाखावलंबनमिव जगदिदमिति मन्यमानाः
केचिदसारसंसारधाराक्लिश्यमनसस्तावदापाततः कमनीयमपि कनकसुतदारा
दिसकलमपि छिंदंतीति॥ भागवतेपि। पुत्रदाराप्तबंधूनां संगमः पांथसंगमः। अनुदेहं
विपद्यंते स्वप्नो निद्रानुगो यथेति। तथा विमोहितोयं जन ईशमायया त्वदीयया त्वां
न भजेत्स्यनर्थदृक्। सुखाय दुःखप्रभवेषु सज्जते गृहेषु योषित्पुरुषश्च वंचित इति।
तथा च भक्तिसुखेनैव परिपूर्णप्राणाः पर्वसिद्धांगनादिसुखमुपेक्षंत इति किमाश्चर्यं।
भक्तिं मुक्तेरपि अधिकत्वं मन्यंते दर्शयति। ये सर्वे देवा नमंति मुमुक्षवो ब्रह्मवादिनश्चेति॥१३॥

43

अकांडब्रह्मांडक्षयचकितदेवासुरकृपाविधेयस्यासीद्यस्त्रिनयनविषंसंहृतव
तः॥सकल्माषःकंठेतवनकुरुतेनश्रियमहोविकारोपिश्लाघ्योभुवनभयभंगव्यसनि
नः॥१४॥ हेत्रिनयनसमुद्रमथनोद्भूतंहालाहलंअभ्यवहृतवतस्तवकंठेयःका
लिमाजातःसनैवश्रियंशोभांनकुरुतेइतिनअपितुकुरुतएवेत्यर्थः॥ननुश्रीवत्सकि
मितिविषंपीतवानित्यतआह अकांडेति। अकालिकविश्वोर्मिवेगसंभवात महाप्रल
यभीतेंद्रवालिप्रभृतिसुरासुरकृपावश्यस्येत्यर्थः॥ ननुकंठेरंधवलस्यास्यविष
पानजनितविकारःकलंकएवनपुनरलंकारायवहइत्यतआहविकारोपीति।जग
दुपकारायदूषणमपिभूषणमेवेतिभावइत्यर्थः॥ अथयंतुहेत्रिनयनसकल्माष
स्तवकंठेनश्रीनेश्रीरश्रीरित्यर्थः अतोप्येतियावत्तांनकुरुतेअपितुकुरुतएवेति
काकूक्त्याव्याख्येयंनेकंनेकधेत्यादिचदनुबंधरहितनिषेधार्थकनकारेणसमस्त

लीनं त्वोपाभावः। सकलब्रह्मांडप्रळयकालानळं यहृतस्तस्य विकियद्धालाहलं य
त्कल्मसा दृष्ट्वा स्तैव कंठेव त्वं बितमितिकर्तुमकर्तुमन्यथाकर्तुं समर्थस्य तव वि
षधारणेनातीव श्लाघावहमिति भावः। अकांडेत्यादिपदव्याख्या पूर्ववत्। अथ
वा अकांडे अकाले ब्रह्मांडक्षयो यस्मादित्यकांडब्रह्मांडक्षयस्तत्संबोधनं अकां
ड ब्रह्मांडक्षयेति भिन्नं। परमसदाशिवमेकोस्तावद्दूषणोपवर्गकालेप्याग
पि ब्रह्मांडमुद्दिघगच्छतिते नय स्मादकालेपि ब्रह्मांडक्षयस्तस्याकालहाला
हलविनाशेऽशक्तिर्येन तदविनाश्यैव कंठे धृतमिति भावः। चकिताः भीता देवा
असुराश्च यस्मादिति चकितदेवासुरेत्यपि भिन्नं। भीषास्माद्वातः पवते भीषो
देति सूर्य इति श्रुतेः। तथा च यतो देवाश्चासुराश्च भीता भवंति कियत्तस्य गरलमि

२४

तिभावः। यद्यालवकंठेयः सः प्रसिद्धः कल्माष आसीत् तेन त्वं श्रियं दुर्धरमपिवि
धेमया धन्नास्ति तिश्लाघां न कुरु अत्र हेतुमाह अकांडेति। अकांडे असमये डक्षयस्य च
किं तद्देवासुरैः तिस्नावः। तथा चोक्तं। सुधामथ्यास्या घ्रातिनयजरामृहरणीविप
घेते विश्वे विपरीतमखाद्यादिविवर्द्धः। करालंयक्ष्वेडकवलितवतल्लोकंकलेना
नशंभोस्तनमृलेजननितवताटंकमहिमेति लिपाविद्येतेयस्याः सा ताद्दशीपार्व
तीतया विधेयोनुगृहीतस्तस्येत्यर्थः। पार्वतीकृपाकटाक्षेणानुगृहीतेनाकिं किं न कृ
तुं राकपतद्दतितत्कृपाकटाक्षानुगृहीते त्वयि विषधारणं नातीवचमत्कारावहं
पत्नीवर्तिनेनापि भर्तुः प्रीतिर्लोकेपि दृष्टेति नेश्वरस्तोति प्रवृत्तस्य स्वंमभिधानमतु
चितमिति श्लोयापक्षांतरमाह। अहो इत्याश्चर्ये भुवनभयभंगव्यसनिनः विकारो
पि यास्लाघ्य एव। इदृशोयं भगवान् कृपानिधिर्यद्भुवनभयभंजनार्थं स्वयमेव वि

पु ३
x पापुष्वं
लिपाववा
सपाहापो x
५ x

येथीलपर्व
णीवलिति
सरीस x २

२४

५१

षमपि स्वीकृतवानिति लोकोत्तरख्यातिसंपादनाय विबंधतवानिति भावः। यद्य
प्यवाप्तसकलकामस्य किमेतत् तथापि लोकशिक्षार्थं तथानुष्ठानं। लोका अ
पि परमेश्वरभजनार्थं स्वविकारमपि प्रनुतिष्ठेयुरिति। यद्यदाचरति श्रेष्ठस्तत्तदे
वेतरो जन इतिन्यायादिति भावः॥१४॥ असिद्धार्था नेव कश्चिदपि सदेवासुरे न
रे निवर्त्तते निःसंजगति त्रुयिनो यस्य विशिखाः। स पश्यन्नीशात्मीमितरसुरसा
धारणमभूत्स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः॥१५॥ हे हरनि
त्यं जयन्नीलस्य यस्य बाणाः देवासुरनरसहिते जगति कश्चिदपि देवे दैत्ये नरे
वा अकृतकार्या न प्रत्यावर्त्तन्ते नाद्भुताः स्वः के दर्पः स्मर्तव्यः प्रसक्षा विषयता स्मृति
मात्रगोचर आत्मास्वरूपं यस्य स एवंभूतो मदनः त्वयि [illegible] कारणमाह।

47

किं कुर्वन् भवं संपश्यं प्रादयोमज्जयाश्च तथायमपीश्वरमितरदेववत्तुल्यं पश्यन्तीति।
हेतोरीशानुप्रश्नयः।। ते नेतरदेवसाधारणहेतेन स्वदर्शनमेवाश्चय्यघानेन विनाशहे
तुरितिभावः।। अत्र केचिन्मृतकन्यायमाहुः नहीयाद्रिदीहियस्माद्धरिशिशुजिते द्वियेषु
अन्येष्वपि परिभवस्तिरस्कारः पथ्यो हितो न भवति स्वनाशायैव संपद्यते त
त्र किमु वक्तव्यं परमवज्ञानि परमेश्वरेऽर्वाचीनसुरसाधारणदर्शनरूपतिर
स्कारः पथ्यो न भवतीति वदंति। वयं तु यस्तावद्विषयेभ्यो विरक्तः सर्वोत्कर्षेण
च परमेश्वरं पश्यति स शरीरसंबंधरूपात्संसारान्मुच्यत इति प्रसिद्धं मदने
स्तु पुनः सकलविषयानुषक्तिरोमणिस्थित्वभुवनमपि संसारैकारागारे निवेशी
यन् सर्वोत्तमं च त्वामर्वाचीनेषु सुरवाद्भजेत तथा पश्यन्नपि स्मृतेयशरीरआत्सं
तिकशरीरामिर्वति लक्षणमोक्षवानासीदिति भृत्युं भवदर्शनसामर्थ्यं। नन्वेपराधि

२८

न२

नोस्य बंधाए वो चितो न तु मोक्षस्तद्स्यत आह नहीति न खलु शिष्टु स्वतंत्रेषु परिभवः कथमिछं
क्षेतमिति पर्यनुयोगः पथ्यो युक्तो न भवति प्रभुः स्वातंत्र्यमापन्नो यदिच्छति करोति
तदिति न्यायादित्यर्थः। यद्वा इतरे सुराः साधारणा अपहे लोष्टाय स्मादितीतरसुर
साधारणस्तथा भूतं त्वां पश्यन्नस्मरो निर्मुक्तशरीर आसीदित्यर्थः। अयमाश
यः। सर्वे चाप्यकुंठितगतिको मदनस्त्वामपि भेत्तुं समागतोपि त्वयि कुंठितश
क्तिकृतयेतरेषां स्वपराभूततया तदपेक्षया पञ्चेषुत्वं पश्यन्नत्वांतस्त्वात्स्यतया
सर्वोत्कृष्टनिर्विकारसच्चिदानंदस्वरूपत्वेन पश्यन्नसत्क्षशरीरसंबंधोभूदिति।
एवंभूतस्त्वं च स्वैर्लोकविजयिनापि स्मरेणाजय्यतया विज्ञातोसि। एतावद्धास्त्वत
वसाचाक्षीसीरः ये न महापराधवानपि मदनः संसारकारागाराद्विमोचितः।
ननु भगवानपि मया जेतव्य इति विपर्ययबुध्या प्रथममागतो सोपश्चात्कुंठितशक्ति

दैवात्स्मरमोहेषु तेन भगवंतं साक्षात्कृतवानिति नास्य संबंधनिर्मुक्तिरुचितेत्यत आह न
हीति। यतिषु वैरीकृतपरमेश्वरेषु साक्षात्कृतपरमेश्वरेष्विति यावत् परिभवः परिस
वैत उञ्चनीचेषु भवः संसारः पश्चात् मुक्तो न भवति किंतु मुक्तिरेव। परमात्मसाक्षात्कारेण
प्रारब्धनकर्मविनाशान्मुक्तिरुचितेति भावः। तदुक्तं भिद्यते हृदयग्रंथिश्छिद्यंते चास्य संश
याः। क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे इति। श्रुतिरपि। आत्मानं चेद्विजानी
यादयमस्मीति पूरुषः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति। तथा। यदा स
र्वे प्रमुच्यंते येऽस्य कामा हृदि श्रिताः। किमिच्छन् कस्य कामाय शरीरमनुसंचरेदिति
॥१५॥ महीपादाघाताद्व्रजति सहसा संशयपदं पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्ण
ग्रहगणं॥ मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा जगद्रक्षायै त्वं नटसि ननु

वामेव विभुता ॥१५॥ हे ईश त्वं जगत्पालनाय संध्यायां जिघांसंतं वरलब्धतत्कालबलं
महाराक्षसं विमोहयितुं नृत्यसि जगंति तु त्वत्तांडवेन संशयितानि भवंति । तथाहि । मही
सहसा वेगेन त्वदीयचरणाभिघातात् संशयपदं जीविते संशयं प्राप्नोति । तथा व्योम्नि
तीनृत्यकाले सर्वतश्चलंतो ये भुजा एव परिघा अर्गलास्तै रुग्णाः ग्रहगणाः य
यो दिसमहायत्रेति विष्णोःपदं अंतरिक्षमपि संशयपदं प्राप्नोति । तथा द्यौः स्वर्गः
मुहुर्दौस्थ्यं दुःस्थत्वं याति कथंभूता सा अनिभृता असंवृता या जटास्ताभिस्ताडितं
अभिहतं तटं प्रदेशं यस्याः सेति । ननु जगदुपकारार्थं भगवति प्रवर्त्तते कथमपकारो
जीनत इत्यत आह नन्विसादि । ननु निश्चितं विभुता प्रभुता वामैव प्रतिकूलैव अनुकू
ला चरतोऽपि किंचित्प्रतिकूलमेव स्यात्परोक्षैव । दृष्टो हि स्वल्पकेऽपि राजनि स्वदेशार

१
२१

दुस्थाश्रीयद

रणाय सेनया सह संचरति स्वराष्ट्रोपद्रवः किमुत महेश्वरस्याकुः। वयं तु। सकलब्रह्मां
ड प्रलयकालीनेन महेश्वरतांडवमत्र प्रस्तूयते। हे ईश त्वं जगतश्चराचरस्य रक्षाभ
स्मविनाशाद् इति यावन्न दृश्यते तस्मिन्प्रलयकाले नृत्यव्याजेन निखिलब्रह्मांडं संहृतवान
सीत्यर्थः। तथैवाह। मह्यासादि। पादाघातान्मही संशयपदं विनाशावस्थां प्राप्ता त्वमङ्
ज्ञाघ्रिघातेन च सचंद्रतारकं अंतरिक्षं तथा अभ्यवत्। न तत् चंद्रतारकं इत्यादि श्रुतेः।
असंभ्रमं जटाताडनाभ्यां द्यौलोकोपि दौःस्थ्यं प्रापेति। ननु न हरचनानुषंगेण किमि
ति जगत्संहृतवान्। न हि स्वतंत्रस्यास्य नृत्यं विना जगत्संहरणार्थं सामर्थ्यमस्ती
त्यत आह नन्विति। विभुता ईश्वरता यामेवैवं केवा र ऋजुमार्गेण सिध्यंतमप्यर्थं वक्र
मार्गेणैव साधयंति। लौकिका अपि हि केचिद्दूरीयंस्त्यलकुर्वंति चान्यदिति प्रसिद्धं ॥१६॥

२०

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः प्रवाहो वारां यः पृषतलघुदृष्टः शि
रसि ते। जगद्द्वीपाकारं जलधिवलयं तेन कृतमित्यनेनैवोन्नेयं धृतमहिम दिव्यं
तव वपुः ॥१७॥ हे ईश अनेनैव लिंगेन दिवि भवं दिव्यं ब्रह्मादिषु देवेषु मंशत्वेन
स्थितं तव वपुः धृतमहिम सर्वेभ्यो महत्त्वमूहनीयं। एतावतैव विनिश्चेतुं श
क्यं किमित्यत्र प्रमाणांतरमपेक्षणीयमित्येवकारार्थः इतिशब्दः प्रकारार्थः। एवं
प्रकारेण लिंगेनेत्यर्थः। तमेव प्रकारं दर्शयति। तव शिरसि पृषतात् बिंदोरपि
लघुरल्पतरो दृष्टो यः वारां प्रवाहः स एव वियद्व्यापी आ स्लोकथंभ्रतः सन्
नक्षत्रवृंदेनोत्पातिनां वर्द्धितां फेनसंततिं शोभा यस्मिन्निति तथा किंच तेन वारां
प्रवाहेण जलधिवलयं समुद्रमंडलं कृतं। कथंभूतं तत् जगच्चराचरं जठ्रमध्य

स्थितो भूखंडे द्वीपस्तदाकारं यत्रेति तथा। अनेन जलेऽधिजलस्य महापरिमाण
ता दर्शिता। अगस्त्येन हि सप्तस्वपि समुद्रेषु प्रपीतेषु पुनर्भगीरथानीतगंगाप्रवाहे
णैव तेषां पूरणं जातमिति पुराणप्रसिद्धमिति भावः॥ वयं तु तव शिरसि यः पृषतले
घुदृष्टो वारां प्रवाहस्तेन जलधिवलयं कृतं वियद्व्यापी तेन लिंगेनैवं मवसी
यते स वारां प्रवाहः धृतः महिमा मंदाकिन्यादि महदाकारो येनेति धृतमहिम
दिव्यं तव वपुः स्वशरीरं सदात्मकं एवं नहि स्वरूपेण सता वियद्व्यापिजलधिनि
र्माणं च कर्तुं शक्या त्वदंशाद्विना। उक्तं च श्रोतसामस्मि जाह्नवीति। यद्वा अने
नोदकप्रवाहरूपदृष्टांतेनैवमनुमेयं यद्धृतधृतमहिमदिव्यं वस्तु तत्तत्तव वपु
स्तत्तेजोंऽशसंभवमिति यावत्। सर्वमहत्तरं वस्तु ईश्वरांशसंभूतं धृतमहिम

लोऽऽगंगाप्रवाहवत्‌। गंगाप्रवाहस्य च धृतमहिमत्वं वियद्व्यापित्वादिना दर्शितं।
ईश्वरशरीरासंभृतत्वं चेश्वरशिरःप्रभवत्वेन स्पष्टमेवेति। तथा चोक्तं। यद्यद्विभू
तिमत्सत्वं श्रीमदूर्जितमेव वा। तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवमिति। श्रुतिर
पि। यस्येमे हिमवंतो महित्वा यस्य समुद्रं रसया सहाहुः। यस्येमाः प्रदिशो यस्य
बाहू कस्मै देवाय हविषा विधेम। यस्येमे हिमवतो हिमवत्प्रभृतयः पर्वता महि
त्वा माहात्म्येनाहुः रसया पृथ्व्या सह समुद्रं यस्य महत्ता आहुः प्रदिशः यस्य
माहात्म्येन तथा यस्य बाहू वचनव्यत्ययः बाहवः क्षत्रियाद्याः यस्य महित्वाय
तेजोंऽशसंभवा इत्यर्थः॥१७॥ रथः क्षोणी यंता शतधृतिरगेंद्रो धनुरथो रथांगे
चंद्रार्कौ रथचरणपाणिः शर इति। दिधक्षोस्ते कोयं त्रिपुरतृणमाडंबरविधि

विधेयैः क्रीडंस्यो न खलु परतंत्राः प्रभुधियः ॥१८॥ हे ईश त्रयाणां पुराणां समाहा
रस्त्रिपुरं तद्दग्धुमनायासेनास्य लीलातो दग्धुमिच्छोस्तव कोयं महत्प्रयोजनमुद्दिश्य
वसंभ्रमरचना न हि लौकिका अपि नखच्छेद्ये कुठारं प्रतिगृह्णंति अतस्तवायं स्वे
प्रयोजनेन महानुप्रयास उचित इत्यर्थः। आडंबरविधिमेवाह रथ इत्यादि। पृथ्वी रथः
ब्रह्मा सारथिः। मेरुः कोदंडं। सोमसूर्यौ द्वे चक्रे। चक्रपाणिर्विष्णुः शरः। इति शब्दो प्रका
रांतरोपलक्षणार्थः॥ एवमाक्षिप्य परिहारमाह खलु निश्चयेन ते प्रभोरीशस्य बुधयः
संकल्पाविशेषाः परतंत्राः पराधीना न भवंति अपि तु स्वतंत्रा एव क्रीडयतस्ताः
विधेयैः स्वाधीनैः पदार्थैः क्रीडासाधनीभूतैः क्रीडतः परमेश्वरस्य लोकवेदनि
यमानधीनबुद्धेर्न किंचिदप्यनुचितमिति भावः। यद्वाऽयं पूर्वोक्ताडंबरनैरपे
क्ष्येणैव त्रिपुरचूर्णीकरणसमर्थस्याडंबरविधिः कः न कोपीत्यर्थः। अयं हि देवा

भ०

२०

नां स्वसेवाडंबराविधिं न तु प्रभोस्तव कार्योपकरणाडंबरविधिः। सर्वे हि ब्रह्माद
यस्त्रिपुरासुरकृतपीडयार्दिताः। एवं प्रसंगागतास्तेषु केनचित्स्वकार्यसाधने स
मर्थस्य भगवतः प्रसादार्थी रथत्वं केनचित्सारथित्वं केनचिद्धनुष्ट्वं केनचिच्चक्र
त्वं केनचिच्छरत्वं स्वीकृतमिति लोकेपि हि कार्यार्थिनः केचिन्महांतं प्रति कार्यार्थ
मागता एवमाचक्षते भवद्भिरस्मत्कार्यं विधेयं वयं वा नो। नानेन प्रकारेण भव
द्वा स्वमाचरामइति। तथा च ये स्वं प्रति समायातास्तैः सह तत्कार्यार्थं गमने को
वा आडंबरविधिरिति भावः। ननु स्वतः समर्थेनानेन किमिति ब्रह्मादिभिः स
ह त्रिपुरदहनार्थं गतं कथं च ब्रह्मादिभिर्हि महादेवाय न तदर्थं समाहृतो येनोप
करणसामग्रीत्वमवलंबितमित्याक्षेपद्वयं क्रमेण परिहरति विधेयैरित्यादि। प्र

श०

भुधियः विधेयैः स्वपरिचारकैः सहक्रीडंतो दृष्टा एवेति नाद्यदोषः ॥ प्रभुधियः पर
तंत्रान भवंतीति नात्योपि दोष इति भावः ॥१८॥ हरिस्ते साहस्रं कमलबलिमाधा
य पदयोर्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलं। गतो भक्त्युद्रेकः परिणतिम
सौ चक्रवपुषा त्रयाणां रक्षायै त्रिपुरहर जागर्त्ति जगतां ॥१९॥ हे त्रिपुरहर यत्
विष्णुस्तव चरणयोः सहस्रसंख्यपद्मानामुपहारं समर्प्य तस्मिन्सहस्रक
मलानामेकबलावेकेन कमलेन भक्तिपरीक्षार्थं त्वया गोपिते न हीने सति नियम
भंगो माभूदिति तत्पूरणार्थं तदा कमलांतरमलभमानो निजं नेत्रकमलमेवो
द्धृतवान् सो भक्त्युद्रेकः सतं प्रकर्षः सुदर्शनरूपेण परिणतिं गतः स नूनं त्रयाणां जग
तां पालनाय जागर्ति सर्वदा। देवासुराणां युद्धमभवद्दैत्यैर्निर्जिताश्च देवाः विष्णोः

३०

शरणं ययुः। जलंधरवधार्थाय यचूलपाणेश्चक्रं तच्चक्रं ध्यातेन दैत्यान् विनाशये
तितं प्रत्यूचुः। नन्वमेतत्करिष्यामीति विष्णुरवोचत्। तदर्थं सहस्रकमलैः शिवा
र्चनमकरोत्। तत्र चैकस्मिन्कमले गोपिते सति नेत्रमेवात्मीयमुद्धृतं विष्णुना त
तः प्रसन्नेन महेश्वरेण त्रिजगत्पालनार्थं विष्णवे सुदर्शनं दत्तमिति पुराणप्र
सिद्धं॥ यद्वा हरिहरयोः पारमार्थिकभेदाभावाच्छ्वत एव त्रैलोक्यरक्षणसमर्थस्य
हरेर्नेत्रन्यधीनं सामर्थ्यमिति हरिहरयोः पूज्यपूजकभावो लोकशिक्षार्थ एवे
ति तदनुसारेणैव व्याख्यायते। असौ पर्वतीनेत्रस्य द्वैकः त्रयाणां जगतां रक्षायै
धर्मसंरक्षणार्थं जागर्त्ति। यद्यपि सर्वतिश्रेष्ठस्तत्रैदेवतरोत्तनरतिन्या यात् ज
गतां यानि त्रयाणि तापत्रयाणि तेषां रक्षायै आधिदैविकाधिभौतिकाध्यात्मिक ता
पत्रयविनाशायेति वा त्रयाणां रागद्वेषमोहरूपदोषाणां रक्षायै विनाशायेति वा।

विष्णुर्नाम भगवति महारुद्रे पूजिते सति लौकिका अपि तथैव कर्म कुर्युस्तापत्रयाच्च
निर्मुक्ताः स्युरिति भावः। ननु स्वार्थमेव विष्णुः कथं न त्रिशिवं पूजितवानित्यत आह के
यं भूतो हरिः चक्रैकवपुषा चक्राद्यंकितशरीराकारेण परिणतो भिन्नाकारतां प्राप्तः
वस्तुतः शिवाभिन्न एवासौ तत्र च शरीराद्युपाधिभेदभिन्नस्तथा च नास्य स्वार्थे
भगवत्पूजनं किंतु जगच्छिक्षार्थमेवेति ध्वनितं। तथा चैतादृशो भगवान् कृपानिधि
र्लोकहितार्थं स्वयमेव पूज्यपूजकभावमंगीकृतवानिति भावः।।१९।। क्रतौ सु
प्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते। अ
तस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं श्रुतौ श्रद्धां बध्वा दृढपरिकरः कर्मसु ज
नः।।२०।। हे हर क्रतौ यागे सुप्ते ध्वस्ते सति क्रतुमतां यजमानानां फलसंबंधे

त्वं जागृदसि प्रबुद्ध इव वर्तसे। ननु ध्वस्तो याग एव फलं दास्यति किमीश्वरेण स
त आह बैकर्मेति। यागस्याशुविनाशितया कालांतरभाविफलजनकत्वेन साक्षा
दितीश्वरप्रीतिरेव द्वारमिति भावः॥ इदमत्राकूतं। यागादेर्निर्व्यापारत्वेनैयुत
प्रवृत्ति सघटितं कारणत्वमेव न संभवति तद्द्वारा स्वर्गादिजननमेवं समये
संबंधाभावात् व्यापारसत्वे च तद्रूपस्यैव संबंधस्य सत्वान्न दोषः॥ किंच चिर
ध्वस्तं कारणं व्यापारव्याप्तमिति तदभावेन व्यापीभूतं कारणत्वं निवर्तते व्या
पकनिवृत्तौ व्याप्यनिवृत्तेरावश्यकत्वात्। यदाहुराचार्याः चिरध्वस्तं फलायाऽ
लं न कर्मातिशयं विनेति। न चैवमपि यागध्वंस एव व्यापारोऽस्त्विति वाच्यं प्रति
योगितदभावयोरेकत्रा जनकत्वेन यागस्यैवं सत्सजनकत्वापत्तेः प्रस्तुतकारणी

३२

ष्टतात्भावप्रतियोगित्वेन प्रतिबंधकत्वेव स्यात्। न च प्रतियोगिनध्वंसयोरप्येकत्र
जनकत्वं दृष्टमेव यथा मिथ्याज्ञानं तद्ध्वंसश्च चरमदुःखोत्पत्तिकारणमिति
वाच्यं मिथ्याज्ञानजन्यसंस्कारध्वंसस्यैव तत्र हेतुत्वाभ्युपगमात्। यदपि द्विती
यप्रकाशे यागजन्यशरीरविशेष एव द्वारमिति मतं श्रूयते तदपि न प्रलयानं
तरमपि प्राक्तनयागजन्यस्वर्गाभ्युपगमात् प्रलयस्य कार्यद्रव्यानधिकरण
त्वेन तदानीं शरीरस्याभावात्। तस्माद्देवताप्रीतिरेव व्यापार इति केचित्। नन्वसं
गतमेतत्। तथा हि। मंत्रवर्णमयी देवतेति गुरवः प्रतिपन्नाः। न चैषां मते देवताप्रीतिः
संभवति तस्याश्चेतनधर्मत्वात्। न हि शब्दः कश्चिद्देवता चेतना। कश्चिदचेतनापीत्याकु
युक्तं चैतत् वज्रहस्तः पुरंदर इत्यादिगुणवादबलेन शरीरस्वामित्वादिदेवतात्म

ध

वचनेन चानियमपक्षस्यैव श्रेष्ठत्वात् एषामपि मते तावदचेतनानां प्रीतिरसंभावितैवचे
तनानामपि नाग्नेः प्रत्तस्य भस्मीभूतस्य हविषो भोगो भवति येन प्रीतिः स्यात् यदा कु
पार्थसारथिमिश्राः सत्यपि विग्रहे प्रत्तस्य हविषो देवताया भोगः प्रत्यक्षविरुद्धो
राक्योऽभ्युपगन्तुं न चाभुञ्जाना प्रसीदन्तीति युक्तमिति। नन्वेवं मन्त्रार्थवादादिभ्यो वि
ग्रहादिपञ्चकमवगम्यमानं विरुद्ध्येत तथा हि सहस्राक्षो गोत्रभिद्वज्रबाहुरिति विग्रहः।
अग्निरिदं हविरजुषतेति हविःस्वीकारः। अद्धीदं इन्द्र प्रस्थितेमा हवींषीति हवि
र्भोजनं। तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयतीति तृप्तिप्रसादाविति चेन्न। प्रत्यक्ष
विरोधेन तेषां स्वार्थे तात्पर्याभावात् अन्यथैकस्मिन् यागे व्यापृतायामिन्द्रदेवतायां त
त्कालीनयागान्तरवैगुण्यापत्तेः। तस्मान्न देवता न चागस्य हविर्गृहीत्वा फलं ददाति

63

त्ति

दियुक्तं। लोकमंडूकादीनां तिरश्चामोषधिवनस्पत्यादीनां च फलप्रदत्वी संभवाद्वि
तेनेंद्रोदेवतायस्येत्यर्थे तद्धितविधानाद्धीद्धदेवताके कर्मण्युभियवेगम्यते देव
दितरु तात्वं च यद्वाचिकांश्रुतिमुद्देश्य प्रतिसंधाय वा द्रव्यं सज्यते तत्देवसंपादितं भवती
ति शब्दाकांक्षापंक्तीयां विधिगतत्वेन च रार्थ उपास्थितत्वात्संबंध्यत इति शाब्दः सवेच्च
देवतासन्निधिर्नेतुशारीरो बौद्धो वा अचेतनदेवतासाधारण्यार्थं शाब्दसन्नि
धेरेव स्वीकर्तव्यत्वात्। किंचैंद्राग्न्यादिदेवताकयागादग्नींद्रादेः प्रीतावपि परमे
श्वरप्रीतेस्प्रमाणाभावः। न च व्ययोद्देशेनत्यक्ते ऽन्यस्य प्रीतिर्भवति। न चैष एव
हि सर्वे देवा इतिश्रुतेरेतस्यापि प्रीतिरस्त्येवेति वाच्यं ईश्वरस्यादृष्टाभावेन ३३
सुखोत्पत्तेरसंभावितत्वात् न चेश्वरातिरिक्तमात्मांतरमेव ब्रह्म विष्णुमहे

हेश्वरादिकमितिवाच्यं भगवद्गीतादिषु ब्रह्मादियज्ञेषु स्यैश्वरैक्यप्रतिपादनात् तस्माद
एवं व्यापारतन्त्रेवाच्यमिति प्राभाकरा ॥ कल्प्यमिति भट्टतार्किककाणादप्रभृतय ॥
येपि तार्किकैकदेशिनो जीववदीश्वरस्य चतुर्दशगुणवत्त्वमाचक्षते यदाहुः न्यायनि
बंधे जगज्जेतुरुः ईश्वरेऽनित्यज्ञानवदनित्यप्रयत्नस्यापि स्वीकार एवेति । शारी
धरेपीश्वरवादसमाप्तौ ईश्वरेऽनित्यज्ञानादिकं धर्माधर्मौ स्वीकुर्वन्ती त्याशिहितं
तेषाममपि मते प्रीतेः क्षणिकतया कथमिव यागव्यापारत्वमुपपादनीयं क्षणिकत्वी
देवसुखज्ञानमपि न व्यापारः ॥ तज्जन्यसंस्कारस्य त्वेस्व तित्वापत्तेः स्मरणादिनासं
स्कार विनाशे फलानुसारापातीच्चादेवताप्रीतेः फलव्याधिकरणत्वेन समानाधिक

6

65

३५

रणापूर्वस्यैव व्यापारस्य कल्पनौचित्याच्च । अत एव गयाश्राद्धादिजन्यमपूर्वं पितॄणां
येति शेषखंडे स्पष्टीकृतं । देवताप्रीतेरपि संप्रीणयागसाध्यतया तदर्थमपूर्व
स्यावश्यकत्वाच्च । किं च पुण्यप्रदः पुण्यमाप्नोतीति पुण्यप्रदानं कर्तव्यतयावगम्यते
न च देवताप्रीतिर्दातुं शक्या तस्यां च पचनस्वगतमपूर्वं तु दातुं । तस्माद्यागाद्धर्मो भ
वति तत एव स्वर्गादिफलं देवता त्वितिकर्तव्यतांतर्गतत्वप्रजोपयोगानुयाजादिवद्या
गांगमिति सिद्धं । अत्राहुः । किं धर्मोन्यानधिष्ठित एव फलप्रदः किं वा केनचिच्चे
तनेनाधिष्ठितस्तथा नाद्यः । अचेतनस्य तारतम्यानभिज्ञस्य यथोचितफल
दातृत्वायोगात् । द्वितीये तु येनाधिष्ठितः स एव फलदातास्तु । न चैवं धर्माधर्मा
नर्थक्यं वैषम्यनैर्घृण्यपरिहाराय धर्मापेक्षणात् । अस्ति तु धर्मे कश्चिद्दुत्तमसु

३५

२ विवक्षितः॥ग्राम्स्ताजनानामितिश्रुतेः॥४६

खं किंचिन्मध्यमसुखं किंचिद्धमं प्रापयन्नीश्वरः कथं विषमो न भवेत् कथं वा
विचित्रं दुःखं प्रापयन्निर्घृणो न भवेत् धर्माधर्मानुसारेण गुरुपितृराजादि
नामिव न तेवैराम्यनैर्घृण्ये विद्येते न च स्तोकमंडूकादीनां तिरश्चामोषधिव
नस्पत्यादीनां च स्थावराणां फलप्रदत्वमयुक्तमिति तत्तथैवास्तु ईश्वरस्य फ
लदातृत्वेकः प्रत्यहः॥यदपि च सत्वे नैमित्तिः पर्जन्यापश्रुतिस्तर्पयतीति तन
त्रापीदं देवतायामवस्थितां तत्र यामीफलप्रदत्वेन ~~प्राधान्यं विवक्षितो धर्म~~॥
तस्मात्परस्मैमेश्वरस्यैव फलप्रदत्वेपि तारतम्यापादननिमित्तत्वेन प्राधान्यं
विवक्षितो धर्मः फलप्रद इति व्यवहारः॥एवं चात्र पुरुषाराधनप्रादेनपुर

पाधिष्ठितादृष्टमेवग्राह्यं पुरुषेणेश्वरेण आराध्यते वैषम्यनैर्घृण्यपरिहारायापेक्षि
तइति पुरुषाराधनमिति श्रूयते । य एतवंतमेव सर्वकर्मफलदाता ऽतस्त्वार्थेषु
पुश्रौतस्मार्तेकर्मसु फलदानाय लग्नकर्मिवसं प्रेक्ष्य तत्कर्मफलदातृत्वप्रतिपा
दकायां ऋतौ स्वार्थे प्रामाण्यं निश्चित्य जनः श्रौतस्मार्तेषु कर्मसु प्रवर्तनारंभो भ
वतीत्यर्थः । ऋतिस्त्व । अहं भुवं वसुनः पूर्व्यः स्पतिरहं धनानि संजयामि शा
श्वतः । मां हवंते पितरं न जंतवोऽहं दाशुषे भजामि भोजनमिति । अहं वसुनो ध
नो पूर्व्यः मुख्यः असाधारणः पतिः स्वामी भुवं अभुवं । तथा हं शाश्वतः शत्रोः
संबंधीनि धनानि संजयामि । किंच मामेव जंतवः प्राणिनो यजमाना हवंते आ

३५

कयंति॥ पितरं न॥ पितरमिव पुत्राः॥ अहं दास्तुभे हविषः प्रदात्रे यजमानाय भो
जनं भुज्यते तद्भोजनं तत्फलं कर्मफलं स्वर्गादि तद्धि भेजामि ददामीत्यर्थः॥ यद्वा
दर्शपूर्णिमासाभ्यां स्वर्गकामो यजेतेत्यादि कर्मविधायकश्रुतौ भगवान् प्रामाण्यं एवं ब
ध्नामि श्रिये इत्यर्थः॥ विध्यपरुद्ध भावनायाः समानपदोपात्तोपि धात्वर्थो न भा
व्यस्तस्यापुरुषार्थत्वात्॥ भिन्नपदोपात्तः स्वर्गोपि न भाव्यः चिरविनष्टेन यागे
न कालांतरभाविस्वर्गजननासंभवेनायोग्यतापराहतत्वादिति श्रुतिरप्रमाण
मिति संप्रामाण्यविपर्ययनिरासः पुरुषाराधनत्वेन द्वारत्वनिश्चयाधीन इति भावः॥
यद्वायमर्थः॥ कर्तावेगवे कल्पेन श्रुते फलजननासमर्थे सति यज्वनां फलसंबंधे त
मेव जानीयद सि॥ ननु यंगमेव कर्मफलं दमस्त्वित्यत आह प्रध्वस्तं कतिपयांगवै

कल्पेन क्षीणशक्तिकं कर्म पुरुषस्य परमात्मनो मानसानुसंधानरूपाराधनं विना
कं फलति न फलतीत्यर्थः । यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं
संपूर्णतां याति सद्यो वंदे तमच्युतमिति स्मृतेः । श्रुतिरपि । स यदा मानुषं वा
चं व्याहरेद्धव्यं चेज्जपेदिति । न चैवमंगातरवैयर्थ्यं । प्रमादादिनांगवैकल्य
स्य वैश्वरनामोक्तिपरिहार्यत्वात् । अत स्वांगयागे पुरुस्मरणद्वारा फलदानप्र
तिभुवं संप्रेक्ष्य तदनुसंधानस्य कर्मसाद्गुण्यकरत्वप्रतिपादकश्रुतो प्रामा
ण्यनिश्चयं ध्वजाजनः ज्योतिष्टोमादिकर्मसु दृढप्रयत्नो भवति । यदि हि त्वदीय
स्मरणस्य कर्मवैगुण्यपरिहारकत्वं न स्यात्तदा कतिपयांगवैगुण्यशंकया नि
शंकं कोपि न प्रवर्तेतेति भावः ॥ ७० ॥ क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता

२६

ऋषीणामार्त्विज्यं कारणाद्सदस्याः सुरगणाः। क्रतुभ्रेषरक्षणैः क्रतुफलविधानव्य
सनिनो ध्रुवं केतुः श्रद्धाविधुरमभिचाराय हिमरश्वः ॥२१॥ क्रियासु पत्नीविघातकु
शलो दक्षः प्रजापतिः क्रतुपतिर्यजमानः। एतेन विद्वत्त्वमधिकारिविशेषणं ध्वनितं। त
थातनुप्रशस्तं शरीरिणां अधीशः स्वामी। अनेनार्थित्वं ध्वनितं। यद्वा तनूनेदारि
ण्यं श्रेषानं बिभ्रतीति तनुभृत उदारास्तेषामधीशः दानशूर इति यावत्। तथा ऋ
षीणां भृग्वादीनामार्त्विज्यं। अनेनांगवैकल्यं नेति ध्वनितं। तथा सुरगणाः ब्रह्मा
दयो देवाः सदस्या उपद्रष्टारः। एतादृशसकलसामग्रीसंपत्तावपि क्रतुफलविधा
नसमर्थात्वसंहृतापमाना क्रतुभ्रेशः क्रतोर्यागस्य यथोचितफलात् भ्रेषः आ
सीत्। अभ्युदयाय कृतो विनाशायैवाभूदित्यर्थः। अत्रैके तु तर्कन्यायमादिशन्ति। ध्व

प्यार्द्रा नक्षत्रस्वरूपो भूत्वा तस्य पश्चाद्भागे स्थितः यो द्यापि मृगशिरोरूपं तं ब्रह्माणं
न त्यजतीति पौराणिकीकथां हृदि निधाय स्तौति॥ ॥प्रजानाथं नाथ त्रसभमभिकं
स्वां दुहितरं गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा॥ धनुःपाणेर्यातं दिवमपि सप
त्राकृतममुं त्रसंतं तेद्यापि त्यजति न मृगव्याधरभसः॥ ॥ हे नाथ धनुःपाणेस्तव
मृगव्याधरभसः मृगान्विध्यतीति मृगव्याधो लुब्धकस्तस्येव रभसउत्साहातिरेकः आर
एव आर्द्रानक्षत्राकारेण परिणतो मृगशिरोरूपेण दिवं प्राप्तमप्यमुं प्रजानाथं ब्र
ह्माणमद्यापि न त्यजति॥ आर्द्रामृगशिरसोः सदा संनिहितत्वात् दुरतस्तवकोपइति
भावः॥ कथंभूतममुं॥ सह पत्रेण शरं शरीरे प्रविश्य अतिव्यथां नीतः स पत्राकृतस्तं स
पत्राकृतं॥ तथा॥ त्रसंतं॥ बिभ्यंतं॥ इदानीमपि धनुःपाणिमेव त्वां पश्यतीत्यर्थः॥ कथंभूतं

प्रजानाथं। रत्यर्थं स्वां दुहितरं कन्यां प्रति प्रसन्नं हठादेव गतं। तथा अभिकं कामुकमित्यर्थः।
कीदृशीं स्वां। रोहिद्भूतां। मृगीभूतामित्यर्थः। किंभूतं प्रजानाथं ऋष्यस्य मृगस्य वपुषा श
रीराकारेण रिरंसं पिबुरंतुमिच्छंतं ॥२२॥ अथ तारकासुरपीडिताः सर्वे सुरा ब्रह्मा
णं ययुः किमिदानीं विधेयमित्यूचुः ततो ब्रह्मोवाच। पुष्पास्त्रो मदनः सहायो विधेयः
स हि तप आचरंतं महादेवं पार्वत्याः सौंदर्यातिशायां सहायी भूय वशीकरिष्यति महा
देवाच्च तस्यां स्वामिकार्तिकेयाभिधः पुत्रो भविष्यति स चैनं नाशयिष्यति ततः पुरंदरेण स्म
तो मदनस्तद्देवसमाययौ। स च तत्र प्रेषितः स च तत्रैव प्रदेशे महादेवपरिचर्यामाचरं
त्याः पार्वत्याः सौंदर्यातिशयेनामुं वशीकरिष्यामीति बुध्वा धृतधनुर्महादेवांतं शरणावि
क्षेपं चकार ततः कुपितो भगवान्नयनानलेन क्षणमात्रेण मदनं भस्मसात्कृतवान् तर्हि तो

बभूव ततोतीव दुःखिता पार्वत्यपीश्वरकलत्रतां कामयमाना तपश्चचार ततः
कियता कालेन ब्रह्मचारिवेषेण शिवस्तामुपागच्छत्य महादेवं निंदितवान् सा च तन्निं
दाश्रवणमसहमाना तेनापश्यत् ततः परमकरुणानिधिर्भगवान् तत्परिणयनानु
कूल्यप्रयत्नमारब्धवानिति पौराणिकप्रसिद्धिं हृदि निधाय स्तौति ॥ स्वलावण्याद्री
सा धृतधनुषम् न्यायतृणवत्स्मरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि । यदि स्त्रैणं चे
वीयमनिरत देहार्द्धघटनाद्वैतिवीमद्राबतनवर मुग्धा युवतय ॥२७॥ हे पुरमथन
हे यमनिरत यमनियमाद्यष्टांगयोगपरायण एते नजितेंद्रियत्वमुक्तं देवीपार्वतीवि
योः स्वशरीरार्द्धे व स्थापनाद्धेतोः भ्रमबीजात्वां स्त्रैणं यद्यथं मदधीनो न भवेत्कथं
मीः स्वशरीरार्द्धे स्थापयेदिति भ्रांता स्त्रीसकंयद्येवेति विद्रोषाद्दृशी नावयत्येके त्येयति

७८

तदद्याप्ययुक्तमेव। अयुक्तस्यापि युक्तत्वे हेतुमाह बतेति हे वरद बत इत्याश्चर्ये युवतय
स्तरुण्यः स्वाभावत एव मुग्धा अतत्त्वज्ञाः। मुग्धत्वमेवोपपादयति। किं कृत्वा ऽवेति।
पुष्पायुधं मदनं त्र्यक्षणवेदन्नायत्री घ्रमेव पुरः स्वक्षं दग्धं दृष्ट्वापि कीदृशं तं। स्वमाः
पार्श्वस्थाः प्रवृत्ताव णेयं सौंदर्यातिशयस्तद्विषयायाआत्री सा परमयोगिनमपि स्मी
रद्धं अस्याः सौंदर्यातिशये नवशीकरिष्यामीति प्रसाह्लाततयानिमित्तभूतयाध्य
तेधनुर्येन तथा तं। तथा च स्वत्नावएपमगणयन्तः कामं च नाशापतो महेश्वरस्य स्त्री
सत्त्वमत्यंतासंभावितमपि कृपोपाधिकदेहार्धघटनेन स्त्रैणत्वं तस्मिन्नपरिच्छि
न्वानीति महाव्यामोहः यतो हि महेश्वरस्य देहार्धधारणं कथमियं पार्वती चिरका
लं मामुद्दिश्य तपः कृतवती विरहदुःखं प्राप्तेति करुणामात्रनिबंधनं न तु वि

षयानुरागनिबंधनमित्यर्थ इत्याहुः। वयंतु विज्ञानानंदघनायाः पार्वत्याः कथमिव
सचेतसां मोहं च कुर्याः कथमिव्यन्यथा व्याकुर्मः देवी पार्वती स्वलावण्यप्रत्याशया
धृतधनुषो मदनस्य दाहं दृष्ट्वापि स्त्रीयत्नं स्त्रीवश्यं जानातीति तद्दृष्ट्वा सत्यमेव कुत
यमनिरतदेहाद्घटनात् यमनियमादिनिरतदेहस्य तपश्चरणात्सादितक्लेरौ
नाद्घटनात् छन्नात्वसंपादनादित्यर्थः। एतादृशस्य स्वशक्तिमहिमायद्वलोत्यावी
त्याऽतिकिरकृतया सर्वजनप्रसिद्धोपि भवान् स्वाधीनः कृत इति भावः। उचितमे
वेदमित्याह युवतयस्तरुण्यः बत इत्याश्चर्ये मुग्धाः मोहनशीलाः योगिनमपि
स्मरणादिव्यामोहयंति। परिमितसौंदर्यशालिन्योपि युवतयो किमुत निरवधिसौं
दर्यशालिनी पार्वतीत्यर्थः। अथवा हे पुरमथन सौ यदि अद्य पारमार्थ्येन अ

४०

वेत्ति जानाति तर्हि देवीपार्श्वे सेवनं तु कश्चिदन्य इत्यर्थः। को अत्र वेदेति निष्क्रांतेः। कुत इत्थं
विज्ञायत इत्यत आह। यमनिरतैर्देहार्द्धघटनीतः। पूर्वोक्त एवार्थः। न हि त्वदीयस्य सौंद
स्थानं विनाहं प्राप्स्ये तस्याः प्रबलतरतपश्चरणप्रयासो युज्यते विशेषतो युवत्याः
युवतयो हि मुग्धा भवंति न काचिदपि तप आचरंत्यो दृष्टाः। एषा तु युवत्यपि सती त्वया
त्वये महत्तप आचरतीति चेदिदमेव सीयते त्वामसौ सम्यग्वेत्तीति। किं च अन्या हि
स्त्रियः कामातुरमेव स्वसौंदर्यातिशयेन वशीकृत्य गंतुमिच्छंति न पुनरन्यादृशामि
ति प्रसिद्धं। एषा तु मदनदाहकमिति विरक्तं त्वां महेंद्रप्रभृतीनवमत्य महता क्लेशेना
लसा लब्धुं यतते तेन पुनरुपेक्षामवलंबते। एतद्व्याख्यानपक्षे स्त्रैणमिति पुष्पायुध
विशेषणं स्त्रीणामयं स्त्रैणस्तं स्त्रीसखीभूतमित्यर्थः। अनेन स्वानुकूलत्वं जकेण्य

५०

स्यादरः पारमार्थिकज्ञानमात्रनिबंधन इति ध्वनितं । तथा च श्रुतिः । अहमेव स्वयमि
दं वदामि जुष्टं देवेभिरुत मानुषेभिः । यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सु
मेधामिति ॥२३॥ श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः
स्रगपि नृकरोटीपरिकरः । अमंगल्यं शीलं तव भवतु नामैवमखिलं तथापि स्म
र्तॄणां वरद परमं मंगलमसि ॥२४॥ श्मशानेषु शवदाहनेषु विहारः । पिशाचा ग्रा
नाः सहायाः । शवदहनभूतिरंगरागः । नृणां करोटयः । शिरोस्थीनि तासां परिकरः
समूहः माला । अपिरनुक्तसमुच्चये ईदृशमाईचर्माद्यन्यदपि इतरत्प्रसिद्धं ॥ ब
यं तु ॥ हे स्मरहर एवं अखिलं श्मशानवासादिरूपं अमंगल्यं वस्तु तव शीलं स्व
भावसिद्धं सत् संभवेनुभवतीति किं । नेत्याह । न । किंतु अमा अविद्या माया । मायोपाधि

कमेवैतत्तु न पारमार्थिकमिति भावः तथा हि सर्थः। एतद्रूपस्य स्वाभाविकत्वे स्मर्तॄणां
मंगळप्रदत्वं न स्यादिति भावः ।१। यद्यप्येवं अखिलं ते शीळं अमंगल्यं भवतु भ
वति वा । न । किंतु अभा । अज्ञान । अस्माकमेव मंगळेप्यमंगळत्वभ्रम इति पावत्ता
कौ वेद भस्माद्याकारेण किंध्वतमिति । तदेवाह तथापीति । स्मशानविहारादिप्रका
रेणापि स्मर्तॄणां मंगळमसि । न च वास्तवममंगळत्वं यदि स्यात्तर्हि तेन रूपेण त्वदी
यस्मरणं मंगळप्रदं न स्यात् न ह्यमंगळमपि मंगळं भवतीति भावः ।२। अथवा त
व शीळममंगल्यं यद्यपि तथापि एवमखिळं तव रूपं नाम निश्चयेन मेऽभवतु । कुत एतत्त
यतस्त्वं परमं मंगळमसि ।।३।। अथवा तव स्मशानविहारादिरूपं शीळं यद्यपि अमंग
ल्यं तथापि अखिळं तव नाम शिवइत्यादिकमेवं अमंगल्यं भवतीति काक्वा व्याख्याने ऽर्थः

अत्र हेतुमाह स्मर्तृणामिति ॥४॥ अथवा तवैतत्सर्वौलं अमंगल्यं शीलं भवतु तथापि
अमा अविद्या चिन्मयी शक्तिः पार्वती एवं न अमंगलं नेत्यर्थः। कथंभूता अमा अतिशये
नयाविघातव अखिलं। त्वदीयं सर्वस्वमित्यर्थः। कुतो नेत्यत आह स्मर्तृणामिति सर्व
मपि चेत्त्वदीयममंगलं तर्हि स्मर्तृणां मंगलप्रदत्वं कथं स्यादित्यर्थः ॥५॥ अथवा संसा
रसागरनिमग्नानां प्राणिनां मम मंगलं शीलं भवतु नाम तथापि कदाचिन्नैव स्मरणक
र्तृणां तेषां त्वं मंगलमसि। अमंगलरूपतामेव दर्शयति। श्मशानेष्विति। श्मशाने
षु श्मशाने तु त्वेषु क्रीडाहेतु विहारः। न यत्र स ब्राह्मणावंदनाजा न यत्र स द्रव्यगुणानु
वादः। न यत्र सत्कर्मकलाकलापः कथं न तद्वामभिलितास पक्षमिलिकैः। न स सखायो
न ददाति सख्यं सच्चानुवेसच मानीय पित्वः। अयास्मात्प्रेयान्तदो को अस्ति पणं

तमन्यमरणं चिदित्थे दितिश्रुतेश्च। तथा चाकुः॥ अनेककरलावलि शालिनाल्याम हृद्वि
ला सः परमोत्सवे श्रीः॥ विद्वत्समोदानकथाप्रसंगो यत्रास्ति तद्धामवदंति शिष्टाः।
इति॥ पिशाचाः पामराः सहचराः॥ तथा चाकुः॥ शास्त्री मुकुटपुरी विहाय वासः सुर
सरिदंबु विहाय चावगाहः॥ भुजिरपि चाविनाशिवाव लोकं स्फुटयति किं न पिशाच
तामभीष्टामिति॥ चिताभस्मतत्सहस्रं परमेश्वरानर्पितं चंदनं आलेपः॥ न्यकरोटी॥ त
त्सहस्रा परमेश्वरानर्पितचंपकादितत्सारिकरोमाला॥ यदाकुः॥ वरं चिताभस्मकृतावले
पो न चंदनेन त्वदनर्पितेन॥ वरं नराणां न कपालमाला न चंपकेनार्पितया विधेनेति॥
अथवा हे स्मरहर एवं प्रकारेण तव सर्वा नाम स्पशीलं अमंगल्यं मंगलेषु साधुमंग
ल्यं न विद्यते मंगल्यं यस्मादित्यमंगल्यं भवतु नाम सर्वेश्वरस्य तव सर्वशीलमिति मं

४२

गळमिषेत्यक्षिमाश्चिर्यं स्मरणेनापि तथा तेन तेन प्रकारेण तत्कामनानुसारेण मं
गळमसि स्मरणमात्रेण स्वीयभक्तानामप्यतिमंगळं ददासीति तव वाञ्छितानुपालु
तेति भावः ॥ भगवतो निखिलश्रीलस्याकृष्टमंगलतामेव दर्शयन्निर्भूम्यां नेषु स
कलप्रपंचध्वंसाधिकरणतया श्मशानेनल्पेषु प्रलयकालेषु आक्रीडा विहारः
आत्मैवेदमग्र आसीदिति श्रुतेः ॥ पिशाचाः पिशाचवत्तुल्या अशरीरिणो जीवात्मा
नः सहचराः ॥ नासदासीन्नो सदासीदिति श्रुतेः ॥ चिताभस्मालेपः ॥ प्रलयकालि
न पांसुसमूह आलेप अंगरागः ॥ यदा कृ ॥ हरः संहारशीलेनं भजति भसितोद्धूल
न विधिमिति ॥ स्रगपि नृकरोटीपरिकरः ॥ करोटीपदेन लक्षणया तत्संबंधी
न्यदृष्टानि लक्ष्यंते ॥ नराणां जीवानां करोट्यः अदृष्टानि तत्परिकरः स्तत्समूह एव

मात्मा। ईश्वरो हि प्रलयकाले तत्तज्जीवादृष्टान्यधिष्ठाय पुनः सर्गाद्यकाले तत्त
दृष्टानुसारेण कार्याण्युत्पादयतीति सिद्धांतात्। एवं सकलसंहरणकालेपि
जागृतस्तवनीलं लोकोत्तरं मंगलमिति भावः॥२४॥ मनः प्रसक्तचित्तैः सविध
मवधाय यात्तमरुतः प्रहृष्यद्रोमाणः प्रमदसलिलोत्संगितदृशः॥ यदालोक्याह्लाद
ह्रद इव निमज्यामृतमये दधत्यंतस्तत्त्वं किमपि यमिनस्तत्किल भवान्॥२५॥ हे वरद
यमिनो योगिनः यत्किमपि विलक्षणमनिर्वचनीयं वस्तु आलोक्य परोक्षीकृत्य आ
ह्लादं बाह्यसुखविलक्षणं निरतिशयसुखं दधति धारयंति तत् किल प्रसिद्धो भ
वान्। निरतिशयानंदावाप्तिस्तत्साक्षात्कारे साध्येति भावः। कीदृशा यमिनः प्रहृ
ष्यंति प्रहृष्यमाणानि रोमाणि येषां ते तथा। पुनः कीदृशाः प्रमदसलिलैरानंदाश्रुभिः

८२

84

रत्नसंगिताः पूर्णा हृद्रा ये षां ते तथा हर्षाश्रुपूर्णनेत्रा इत्यर्थः । अनेनानंदस्य निरतिश
यत्वं मुक्तं । निरतिशयत्वमेव दर्शयितुं दृष्टांतमाह अमृतमये हृदे विमज्जेव यस्य
खलु लेशमात्रमपि स्पृष्टं स कलसंतापोपशमेन सुखिनो भवंति किमुत कर्तव्यं
तस्य निमज्जनरूप सर्वांगसंयोगेनेति कैमुतिकन्यायात्कार्यातिशयः सूचितः । यद्य
पि ब्रह्मानंदस्य सर्वातिशायित्वेन न कोपि दृष्टांतोस्ति तथापि लोकसाम्येनापि लोका
नां बुद्धिप्रवेशाय पदमुक्तं । अथवा अमृतं नित्यं निरतिशयं सुखं तन्मयो हृदः पर
मेश्वरस्तत्र निमज्जनं तेन सायुज्यं तस्माद्यथा आह्लादः तथा तद्वल्लोकनाज्जी
वन्मुक्ता विस्मृपमा । कथंभूतं पदं । अंतस्तलं । अंतर्मध्ये तलानि सर्वाणि भूतानि य
स्य तत्तथा । तथा च श्रुतिः । स वा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूत

नामधिपतिः सर्वेषां भूतानां राजा तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पि
ता एवमेवास्मिन्नात्मनि सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व ए
त आत्मानः समर्पिता इति। एतावद्ध्यानं दानुभवस्य। साधारणं कारणमाह मनः
अंतःकरणं चित्ते हृत्पद्मे अवधाय अवहितमेकाग्रं कृत्वा चित्ताख्ये देशे मनसः
संधानं धारणा तदुक्तं लक्ष्ये स्थैर्यः। कीदृशं मनः प्रसक्तं। प्रसज्य चलति प्रतीपं गच्छतीति
प्रसक्तं। इंद्रियाधीनस्य मनसो या बहिःवृत्ता तां विहाय तैः सहांतर्मुखत्वे प्रत्याहा
रस्तदुक्तं। कीदृशः यमिनः सविधं शरीरशोधनोपायैर्यमनियमासनैर्युक्तं य
थानुवर्तितथा यमादियुक्ताः संतः आत्मरतः कृतप्राणायामाः। अथ कर्मपु
राणाद्यनुसारेणाष्टांगोपेतयोगः प्रदर्श्यते। योगश्चित्तवृत्तिनिरोधः सचाष्टधा।

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिभेदात्। अहिंसास
त्यमस्तेयं ब्रह्मचर्यापरिग्रहः॥ यमाः संक्षेपतः प्रोक्ताश्चित्तशुद्धिप्रदा नृणां॥ सर्व
भूतेष्वक्लेशजननमहिंसा॥ यथार्थकथनाचारः सत्यं। परद्रव्यानपहरणम
स्तेयं। कायवाङ्मनोभिः सर्वत्र मैथुनत्यागो ब्रह्मचर्यं। प्रतिग्रहनिवृत्तिरपरि
ग्रहः। तपः स्वाध्यायसंतोषः शौचमीश्वरपूजनं। समासान्नियमाः प्रोक्ता योग
सिद्धिप्रदायकाः। कृच्छ्रचांद्रायणादिना शरीरशोषणं तपः। वेदांतशतरुद्रिय
प्रणवादि जपः स्वाध्यायः। सत्रेधा वाचिकादिप्रभेदात्। परेषां शब्दबोधजन
कः स्वाध्यायो वाचिकः। ओष्ठयोः स्पंदमात्रेण क्रियमाणः शब्दाबोधजनक उपां
शुः। ओष्ठस्पंदनवर्जितं सर्वशब्दानां चिंतनं मानसो जपः। एतेषां पूर्वं पूर्वापेक्ष

योत्तरोत्तरः श्रेष्ठः॥ यदृच्छालाभमात्रेण तुष्टिः संतोषः॥ शौचं द्विविधं बाह्यमभ्यं
तरं चेति॥ मृज्जलाभ्यां शुद्धिर्बाह्यशौचं॥ मनोमलत्याग आंतरशौचं॥ वाङ्मनः
कायकर्मभिः सुनिश्चलाशीवभक्तिरीश्वरपूजनं॥ आसनं स्वस्तिकं प्रोक्तं पद्म
मर्द्धासनं तथा॥ साधनानां च सर्वेषामेतत्साधनमुत्तमं॥ ऊर्वोरुपरि विप्रेंद्राः कृ
त्वा पादतले उभे॥ समासीतात्मनः पद्ममेतदासनमुत्तमं॥ एकं पादमथैकस्मि
न्विन्यस्योरुणि सत्तमाः॥ आसीतार्द्धासनमिदं योगसाधनमुत्तमं॥ उभे कृत्वा
पादमूले तानुर्वोरंतरेणहि॥ समासीतात्मनः प्रोक्तमासनं स्वस्तिकं बुधः॥
प्राणनिरोधः प्राणायामः॥ स च त्रेधा॥ मंदादिभेदात्॥ मात्रा द्वादशको मंदः॥ चतुर्विंश
तिमात्रको मध्यमः॥ षट्त्रिंशन्मात्रक उत्तमः॥ एतेषां यथाक्रमं प्रस्वेदकंपनोत्थान

४५

जनकत्वे ॥ पूर्वपूर्वापेक्षयोत्तरोत्तरस्योत्तमत्वं च ॥ पुनरपि द्विविधः सगर्भोऽगर्भ
श्च ॥ स जपः सगर्भः । अजपोऽगर्भः ॥ लक्षणांतरमप्युक्तं कूर्मपुराणे ॥ सव्याहृ
तिं सप्रणवां गायत्रीं शिरसा सह । त्रिर्जपेदायतः प्राणान् प्राणायामः स उच्यते ॥ रे
चकः पूरकश्चैव प्राणायामोथ कुंभकः । प्रोच्यते सर्वशास्त्रेषु योगिभिर्यतमानसैः ।
रेचको जस्रनिश्वासः पूरकस्तन्निरोधकः । साम्येन संस्थितिर्यस्य कुंभकः परिगी
यते ॥ प्रत्याहारादिलक्षणमपि तत्रैवोक्तं ॥ इंद्रियाणां विचरतां विषयेषु स्वभावतः । निग्र
हः प्रोच्यते सद्भिः प्रत्याहारस्तु सत्तम ॥ हृत्पुंडरीके नाभ्यां वा मूर्ध्नि पर्वतमस्तके । एव
मादिप्रदेशेषु धारणा चित्तबंधनं ॥ देशावच्छिन्नमालंब्य बुद्धेर्या वृत्तिसंततिः । वृत्त्यंतरै
रसंस्पृष्टा तन्ध्यानं सूरयो विदुः ॥ तथा ॥ शिखाग्रे द्वादशांगुल्ये कल्पयील्लाथ पंकजं ।

धर्मकंदसमुद्भूतं ज्ञाननालं सुशोभनं। ऐश्वर्याष्टदलं श्वेतं परं वैराग्यकर्णिकं॥ चिं
तयेत्परमं कोशं कर्णिकायां हिरण्मयं। सर्वशक्तिमयं साक्षाद्यं प्राहुर्वेदमव्ययं॥ अ
कारवाच्यमव्यक्तं रश्मिज्वालासमाकुलं। चिंतयेत्तत्र विमलं परं ज्योतिर्यदक्षरं। अ
स्मिन् ज्योतिषि विन्यस्य स्वात्मानं तदभेदतः। ध्यायीताकाशमध्यस्थमीशं परमकार
णं। तदात्मा सर्वगो भूत्वा न किंचिदपि चिंतयेत्। एतद्गुह्यतमं ध्यानं ध्यानांतरमथो
च्यते। चिंतयित्वा तु पूर्वोक्तं हृदये पद्ममुत्तमं। आत्मानमथ कर्तारं तत्रानलसमत्वि
षं। मध्ये वह्निशिखाकारं पुरुषं पंचविंशकं। चिंतयेत्परमात्मानं तन्मध्ये गगनं परं। ॐ
कारबोधितं तत्त्वं शाश्वतं शिवमच्युतं। अव्यक्तं प्रकृतौ लीनं परं ज्योतिरनुत्तमं। तद
तः परमं तत्त्वमात्माधारं निरंजनं। ध्यायीत तन्मनो नित्यमेकरूपं महेश्वरं॥ विशोध्य

सर्वे तत्त्वानि प्रणवेवनाथवा पुनः॥ संस्थाप्य परमात्मानं निर्मले परमे पदे। ध्यायेद् यो(?)
त्मनो देहं ते नैव ज्ञानवारिणा॥ चिंतयेत्स्वात्मनी ज्ञानं परं ज्योतिः स्वरूपिणं॥ देहा-
घनालंबने नैकाकारता मनसः समाधिः॥ तदुक्तं तत्रैव॥ एकाकारः समाधिः स्याद्देहा-
लंबनवर्जितः॥ आज्ञया ध्येयरूपेण योगसाधनमुत्तममिति॥ ४५॥ त्वमर्कस्त्वं सो-
मस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योमत्वमु धरणिरात्मा त्वमिति च॥ परि-
च्छिन्नामेवं त्वयि परिणता बिभ्रतु गिरं न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि॥ त्वं
अर्कः सूर्यमंडलांतर्वर्ती पुरुषः॥ तथा च श्रुतिः॥ हिरण्मयेन पात्रेण सत्यस्यापिहि-
तं मुखं॥ योसावादित्ये पुरुषः सोसावहमिति॥ य आदित्ये तिष्ठन्नादित्यस्यांतर इति
च॥ सोमः सोममंडलांतर्वर्ती॥ यश्चन्द्रे तिष्ठन्निति श्रुतेः॥ एवमग्रेपि॥ परिणता परिपक्वाः॥

91

५७

अपरिणता इत्यस्मिन्नर्थे। परिणता इति सोपहासोक्तिः। त्वयि विषये अर्कोपघ्नमात्रस
पत्तेप्रतिपादकं वाचं बिभ्रतु वयं तु इह जगति तत्त्वेन इदंस्त्वं न जानीमोऽपि द्दस्त्वं तत्वेन भ
वसितं त्वदात्मकतयैव सर्वं जानीम इत्यर्थः। एवं च तत्त्वे सर्वात्मकत्वादर्कादिविशेषपुर
स्कारेणैवाभिधानं व्यर्थमेव। अत एवान्तर्यामिब्राह्मणे सर्वोपघ्ना तिरिक्तान्तर्यामि
नयात्मनः प्रतिपादनं॥ मंत्रांतरमपि। इंद्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सु
पर्णो गरुत्मान्। एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः। एष उ ह्येव
सर्वे देवा इति च सर्वदेवभेदं वारयति॥ यद्वा परिणताः परिपक्वा एव पूर्वोक्तां परिच्छि
न्नां निश्चितार्थां गिरं बिभ्रतु वयं तु अपरिणताः यत्त्वेन भवावसिततत्त्वं न विभ्रमः किमुत
यत्त्वं भवसि तन्न जानीम इति। यद्यपीश्वरात्मकं जगत्तथापि सर्वादिवादि शिष्टसा

५७

त्रिधाभाव मात्रेणायत्त्वं नैवस्वीस्कृतिः। अतएव सर्वे स्येश्वरात्मकत्वेपि सत्योपा ए
ल्पम्र्षि सन्निधानं स्मृतिपुराणादौ विशिष्टसान्निध्यमात्रेणैव संगच्छते। नाहिस
वैत्र भगवतोयंत सान्निध्यं। असाधारण्येन कचिदेवसान्निध्यप्रतिपादक
वाक्यानामप्रामाण्यापातात्॥ तथा च कूर्मपुराणे॥ ईश्वर उवाच॥ शृणुध्वं
मृषयः सर्वे प्रभावं परमेष्ठिनः। यं ज्ञात्वा पुरुषो मुक्तो न संसारे पतेत्पुनः।१।प
रात्परतरं ब्रह्म शाश्वतं ध्रुवमक्षरं। नित्यानंदं निर्विकल्पं तद्धाम परमं मम॥२॥
अहं ब्रह्मविदां ब्रह्मा स्वयंभूर्विश्वतोमुखः। मायाविनामहं देवः पुराणो हरिरव्य
यः॥३॥ योगिनामप्यहं शंभुः स्त्रीणां देवी गिरीन्द्रजा। आदित्यानामहं विष्णुर्वसू
नामस्मि पावकः॥४॥ रुद्राणां शंकरश्चास्मि गरुडः पक्षिणामहं॥ ऐरावतो गजे

८

ञ्जाणां रामः शस्त्रभृतामहं॥५॥ऋषीणां च वसिष्ठोहं देवानां च शतक्रतुः॥शिल्पि
नां विश्वकर्माहं प्रह्लादो मरविद्विषां॥६॥मुनीनामप्यहं व्यासो गणानां च विना
यकः॥वीराणां वीरभद्रोहं सिद्धानां कपिलो मुनिः॥७॥पर्वतानामहं मेरुर्नक्षत्राणां
च चंद्रमा॥वज्रं प्रहरणानां च व्रतानां सत्यमस्म्यहं॥८॥अनंतो भोगिनां देवः से
नानीनां च पावकिः॥आश्रमाणां गृहस्थोयमीश्वराणां महेश्वरः॥९॥महाकल्प
श्च कल्पानां युगानां कृतमस्म्यहं॥कुबेरः सर्वयक्षाणां गणादीनां च वीरुधः॥१०॥
प्रजापतीनां दक्षोहं निरृतिः सर्वरक्षसां॥नाथानां विश्वनाथोहं पुरीणां काशिका
पुरी॥११॥मृगेंद्राणां च सिंहोहं यंत्राणां धनुचेव च॥वेदानां सामवेदोहं यजूनां श्री
नरुद्रियं॥१२॥सावित्री सर्वजाप्यानां गुह्यानां प्रणवोस्म्यहं॥सूक्तानां पौरुषं सूक्तं

४८